नं. ५०६०

ऋग्वेद संहिता भाष्यं
वेदार्थ प्रकाशः

श्री सायणः × × —

पत्र. १२६ —— ×

संहिता ब्राह्मणं

ऋग्वेदभाष्यम्

(पंचमाष्टकस्य भागः)

५०७०

5070

#118 double

#120 and 121 Missing

F. = 126

ऋग्वेद संहिताभाष्य पंचमाष्टक

2060

ॐनमोऽऋग्वेदाय॥ॐमू॰॥यस्यनिःश्वसितंवेदायोवेदेभ्योऽखिलंजगत्।निर्ममेतमहंवंदेविद्यातीर्थमहेश्वरं॥अथपंचमाष्टकेऽष्टमोऽध्यायआ
रभ्यते।षष्ठमंडलस्याष्टमेऽनुवाकेचतुर्दशसूक्तानि।तत्रसुषेनरेत्येकादशर्चंप्रथमंसूक्तं।अत्रेयमनुक्रमणिका।सुषएकादशाश्विनं
त्विति।मंडलद्रष्टाबार्हस्पत्योभरद्वाजऋषिः।अनुक्तत्वात्त्रिष्टुप्।अश्विनौदेवते।प्रातरनुवाकाश्विनेषुक्रतौविहमादिकेहेसू
क्तेआश्विनशस्त्रेचैतेएव।सूत्रितंच।सुषेनरेतिसूक्तेइति॥छ॥तत्रप्रथमा॥सुषेनरेति।विबोधकलोकस्यनरानेतारौअस्मद्भुवन
स्यप्रमंताबीश्वरौअश्विनाअश्विनौसुषेअरगीतमंत्रसाध्यैःस्तोत्रैःस्तोतुंअर्कैःअरगीतमंत्रसाध्यैःशस्त्रैःऋजमानःस्तुतिंकुर्वन्नह्वे
वे।आह्वयामि।कीदृशौविल्यपेत्याद्यायांयोमघएवउस्नाशत्रूणांनिवारकोव्युषिव्युष्टौनिशायाःसमाप्तौऽग्नाःप्रथिव्याः
अंतान्पर्यंतान्उरुउरूणिवरांसिरूपश्यावरकाणितमांसिचपरिप्रारित्युपूषतःप्रोक्षुरतः।अथवावरांसितेजांसितमो
निवारणात्पर्युप्रूषतःविस्तारयतः॥छ॥अथद्वितीया।ताव्यद्रमेति।किंचतनौप्रसिद्धावश्विनौयच्छंअस्मदीयंयागंआ
चक्रमाणौअभिचक्रमाणौशुचिभिर्निर्मलैःरजोभिःस्वीयैतेजोभिःरजोरजतेर्ज्योतिरुच्यतेइतियास्केनोक्तत्वात्रथस्यस्वकी
यस्यरथस्यभानुंदीप्तिंरुरुचुःशोचयते।अपिचपुरूण्युरूणिवरांसितमोनिवारकाणि।तेजांसिअमितानिअपरिमितानिमिमाना
निर्मिमाणौधन्वानिमरुप्रदेशान्अज्रान्स्वकीयानश्वान्अतियाथःअतिक्रामयथाः॥छ॥अथतृतीया

।।ता ह त्यद्दिति।। ता ह तौ खलु उ या उग्रौ अश्विनौ युवां यद्दरं अंश्रसमद्धं त्वहन्तिः यजमानस्यात द्दहं समर्द्धयितुं गच्छथः।। किं वद्द ऋाद्र
द्धं धियः स्तोत्र द्दषिरैः एषणीयैः काम्यैः मनोजवेभिः। मनोवेगैः अश्वैः स्तीयैर श्वैः शश्वत सर्वदा ऊहथुः। स्वर्गं प्रापयथः। मर्त्य
स्य मनुष्यस्य दाशुषो यजमानस्य व्याधिः हिंसकः परिशयनाय दीर्घनिद्रायै युवाभ्यां क्रियते।। छ।। अथ चतुर्थी।। तान व्यसइति।। ता
वश्विनौ युयुजानस्य स्तीरथे युज्यमाना श्वौ स्तुमं शोभनं एहम अंपयः। एहइति अत्रनाम सुपाठान। इषं वृष्टिं ऊर्जं रसं च वहन्तौ वहन्तौ
नव्यसो नवतरस्य स्तुतिं कुर्वतो मन्म मननीयं। स्तोत्रं उपभूषतः।। उपगच्छतः। यद्वा स्तोत्र समीपे भवतः।। किं तु युवा नानित्य तरुणो।
तौ होता मा मा हृता। अध्रुक्र अद्रोग्धा प्रियः अत्र सुराणो भिः यसन्नयजत्तु।। छ।। अथ पंचमी।। तावल्गु इति।। याया यो शंसते शस्त्रं
स्तुतिं च वैते स्तुवते स्तोत्रैः स्तुतिं कुर्वते यजमानाय शंभविष्ठा अतिशयेन सुखस्य भावयितारौ अति स्वहंशयेन सुखस्वरूपौ वा
वाग्रणीते स्तोत्र शस्त्र व्यतिरिक्ता स्तो किं के स्तुतिभिः स्तुवते वविश्राणा विचित्र दानौ बभूवतः। तातो वल्गु वल्गन शीलो रुचि
रौ वा पुरुशाक बहुशक्ता अतिशयेन बहुकर्म्माणो वाहुसहायौ वा ऽग्ववाग्नौ पुराणौ गन्तारौ वीति पुराण नाम सुपाठ वदस्मादा
स्वौ अश्विनौ नव्यसा नवतरेण वचसा स्तुत्या आविवासे परिचरामि।। छ।। इति पंचमस्य ऽग्रथमे ऽग्रथमो वर्गः।। छ।। अथ षष्टी।।(
तानुभ्नुपुमितिति।। तानावश्विनौ युवां तुग्रस्य सूनुं भुज्युं भुज्युनामकं समुद्रमध्ये मग्नानां भुजंतारस्तैर्नौभिरेणुभिरेणुरहितैः आंतरिक्षैः

वे॰ भा जोभिर्मार्गैः योजनेभिः रथेषु तैः पतत्रिभिः पतनवद्भिः अश्वैः सो जलस्य उपस्थात् योनेः समुद्रात् वडवो निरूहथुः निरगमयतं
२ समुद्रादन्न इति प्रयोगो मातुर्गर्भाद्गच्छतीतिवत् ॥ छ ॥ अथ सप्तमी ॥ विप्रमुषेति ॥ रथ्या हे रथिना अश्विनौ यज्जुषा जय
शीलेन रथेन अद्रिमार्गे स्थितं पर्वतं विद्यातं बाधेथां यातिरत्र वधकर्मा ॥ तथा च निगमांतरं विद्रुद्रुन्ना नासत्या रथेन
विपर्वतं अजरयू अयातमिति । वृषणा कामानां वर्षितारौ वध्रिमत्याः पुत्रार्थिन्याः हवया ह्वानेन श्रुतं श्रुणुतं । दस्य सं
ना स्तोतृभ्यः कामान् प्रयच्छंतौ शयवे युवां स्तुवते गां निरत्र प्रसावं पिप्यथुः । स्तारिणा प्यायतं । तथा च निगमांतरं यशवे वि
2 न्नासत्या शचीभिर्जसुरये स्तर्यं पिप्यथुर्गामिति । इति इति इत्थं सुमतिं सुष्टुतिं ब्रुवाना आगच्छंतौ भुरण्यू सर्वजगं तारौ पोषकास्वाम
नौ रैवाभवं ॥ छ ॥ अथाष्टमी ॥ यद्रोदसी इति ॥ रोदसी हे द्यावापृथिव्यौ हे आदित्या हे वसवो रुद्रिया सो हे रुद्रपुत्राः मरुतः म
र्त्यत्रा मर्त्येषु अश्विनोः परिचारकेषु देवानां यत् हेलः क्रोधः भूमा महान् जनितः हेलः वपुस्तापकं रक्षो युजे रक्षोभिर्युक्ताय रक्ष
सां स्वामिने प्रेरकाय वा अघं आहं दधातं कुरुतं ॥ अथ वा रक्षो युजे रक्षोभिर्युक्ताय यज्वने अघमहं कुरुतं ॥ छ ॥ अथ नवमी ॥ राम
यईं राजानाविति ॥ यो नरः रजसः समस्तस्य लोकस्य लोकानां सुचक्षतं इति यास्केनोक्तत्वात् ॥ ईमेनाव अश्विनौ ऋतुथा काले काले २
विदधत् परिचरतं मित्रो वरुणश्च चिकेतत् जानीयात् मित्रावरुणा प्रस्रुतयोर्देवाः एनं विडरिष्यर्थः ॥ किं चायं परिचारकः गंभीराय

महाबलाय रक्षसे राक्षसाय हे लिंघातकमायुधं अस्य अस्यति क्षिपति प्रथमपुरुषस्योत्तमपुरुषेण व्यत्ययः ओझो वायस्रतिं ओहान्म
काय आनवाय मनुष्याय वधिने वधस्य चितृ वचनाय हे तिमरयति नतु मनुष्याणाम भिद्रोहाय येन मास्के हंतीति ॥ छ ॥ अथ दशमी
॥ अंतरैश्चक्रैरिति ॥ हे अश्विनौ अंतरैः अनिकृष्टैः च चक्रैर्युक्तेन घर्म्मवाही निमतानरथवतानेनाश्वाः सारथिना युक्तेन यद्वा स्वयं युक्तेन पतंगाः
नर इति अश्वनामसु पाठात् ॥ रथेन वर्त्तिरस्माकं गृहं जनयायतं जनयेद्वा तुं आयातं अपि च सख्युः येन तिरोहितेन यजमानाकोधेन हृणि
स्य जन इति क्रोधनामसु पाठात् ॥ मर्त्यस्य मनुष्यस्य वनुष्यतां बाधमानानां वनुष्यतिर्हिंसाकर्मेति यास्केनोक्तत्वात् शीर्ष्णा
शीर्ष्णां स्यापि वृक्तं अववृक्तं ॥ छ ॥ अथैकादशी ॥ आ परमाभिरिति ॥ हे अश्विनौ परमाभिः उत्कृष्टाभिः उत अपि च मध्यमा
भिः अनुत्कृष्टाभिः अवमाभिः निकृष्टाभिः ऊतिभिः सुदीई हे रथ्या गमदभिमुखं आयातं हे नरः सदृढा पि व्रजस्यापि गोमतो गोयुक्तस्य
व्रजस्य गोष्ठस्य दुरो द्वाराणि विवर्त्ते विवृणुतं किं च गृणते स्तुवते मह्यं चित्रराती भवतं ॥ छ ॥ इति पंचमस्य प्रथमे द्वितीयो वर्गः ॥
क १ स्ये त्येकादशर्चं द्वितीयं सूक्तं ॥ भरद्वाजस्यार्षेयं ॥ अत्रेयमनुक्रमणिका ॥ क्व १ त्ये कपदांतं त्रैष्टुभमिति ॥ आ वां सुम्न इत्येका
दशी एकपदा त्रिष्टुप् शिष्टास्त्रिष्टुभः ॥ आश्विनं त्वित्यनुवृत्तत्वादस्यापि सूक्तस्याश्विनौ देवता ॥ प्रातरनुवाके आश्विनशस्त्रे
चो त्रैष्टुभे छंदसि क्तो विनियोगः ॥ छ ॥ तत्र प्रथमा ॥ क्व १ त्या वल्गू इति ॥ कव्रु च स्थितौ वल्गू हविरो पुरुहूता बहुभिरा

वे॰भा॰ ऽऽतौन्यातावश्विनौतमस्त्वामिहविषायुक्तः नमः आयुरित्यत्रनामसुपाठात्स्तोमः पंचदशास्तोमोयद्धमौनसहितोइतइत्थआविदत
३ विदेत्। यस्तोमोनीर्यस्मादभिसुतंनामत्याश्विनोआवदर्तयत्। अश्विनोयुवाः अस्योत्तोतुःमन्मनस्तोत्रेशेष्टाहिप्रियतमोअहि
असयोमवथ॥छ॥ अथद्वितीया॥ अरंमेगंतमिति॥ हे अश्विनोयुवांमेमदीयायाम्मेहवनायाह्वानायअरंपर्याप्तंगंतंगाछ
तंगच्छतानास्तुयमानोअंधःसोमंयथापिबाथःपिबंतं। शिषोहिंसकसपशाः वोः यहूनिःमऽदेपरियाथः। परितोयाथः यहूनिःप
रोविप्रकृष्टेनतुउयाता। नहिंस्यात्अंतरःसंनिकृष्टोपिनतुउर्यात्। यस्मात्यदूनिःतदस्मदीयंरिषःहिंसकात्परियाथः। त्यदूनिःपरो
विप्रकृष्टःअंतरःसंनिकृष्टोपिनतुतुर्यात्। अयंभावस्यथाअस्मदीयंगृहंदूरस्थःसंनिकृष्टोपिनहिंस्यात्तथारक्षांकुरुथइति॥छ
॥अथतृतीया॥ आकाशिनामिति॥ वांयुवयोरथेअंधसःसोमस्यवरीमन्नविहतेभिषवादेयरूत्यमस्तितदकारिकृतंसुषाय
णतमंमदुत्तमंबर्हिरस्तारिस्तीर्णंउत्तानहस्तःकृतांजलिःयुवयुर्वांकामयमानोहोतावंदस्तोनिवांयुवनसंतोयाक्तवंकःद
स्त्वंदृत्तनस्तगतावितिधातुः। अइयोयावाणःअंजन्सोमरसंसमंताद्व्यक्तीकृतवंतः॥छ॥ अथचतुर्थी॥ ऽऽहोवामिति॥ अ
ग्निःवांयुवयोर्यार्थऽऽह्वोःस्थाताउदितिष्ठत्। अधारश्वयज्ञेश्वयशेतिसमिधआहवनीयंगच्छति। चरातिईनेहविःनृत्तिनी राम
अगामिनीनृस्थिर्जवनेवैतियास्केनोक्तुवाता। व्रतावीह्यतेनाह्वाउपस्तीर्णाभिवारितेच्ययेः। किंचहोताउराणाःउरुकुर्वाणःअगृत्ते ३

मानःप्रकर्षेणगच्छत्कमनाभवति।येहोतारानासत्यावश्विनौहवीमन्आह्वानस्तोत्रेवाऽप्रयुक्तयोजयति।।छ।।अथपंचमी।।
अधिश्रियइति।।पुरुभुजाहेपूर्वभुजौबहूनांरक्षकौवावश्विनौवयोःशतोतिंबहूरक्षांकंबहुगमनंवारथंसूर्यस्यदुहितासू
र्याश्रियेश्रयार्थंअधितस्थौअध्यतिष्ठत्।अपिचयाज्ञियानांदेवानांअजनिमन्अस्मिन्जन्मनिप्रादुर्भावेमायाभिःप्र
ज्ञानैःशचीमायेतिप्रज्ञानामसुमत्सुपाठात्।मायिनौवेज्ञावंतौनरानेतारौनृतूनृत्यंतौभूतंभवतं।यद्वाहेमा
यिनौमायोनरौनेतारौनृत्यंतौअश्विनौयज्ञियानांदेवानांअजनिमन्जन्मनिप्रादुर्भावेप्रभूतंप्राप्तमंअस्मादि
कंदेवंमायाभिःप्रज्ञानैःकोशलेर्वाजिनवंतौस्तुइत्यर्थः।प्रजापतिर्वैसोमायराज्ञेदुहितरंप्रायच्छत्सूर्यांसावित्रीमित्या
दिनास्पष्टीकृतः।।छ।।इतिपंचमस्यप्रथमेतृतीयोवर्गः।।छ।।अथषष्ठी।।युवंश्रीभिरिति।।हेअश्विनौयुवांयुवां
दर्शताभिःदर्शनीयाभिःश्रीभिःश्रीमतांपरिहत्यमानाभिःश्रीभिःलक्ष्मीभिःकांतिभिर्वासूर्यायाःयुवयोःपत्न्याः
शुभेशोभनार्थंपुष्टिंपूर्तिंऊहथुःप्रापयथः।किंचवांयुवां।वयोअश्वाःनवुषेशोभनायेप्रानुपतन्प्रकर्षेण
अन्वपतन्।अपिचदेधिष्ण्यासुस्तुत्यौअश्विनौवांयुवांसुष्टुतावाणीस्तवीतांस्तुतिःन्वहतृप्राप्नोति।।छ।।अ
थसप्तमी।।आवांवयइति।।हेनासत्यौवांयुवांवयोगंतारःवहिष्ठाःवोढतमाःअश्वासोअश्वाःगृध्रःसोमस्य

वे·भा पमन्नं अग्निं आवहंतु आपयंतु वां युवयोः मनोजवाः मनोवेगा रथ्याः रसः संपर्चनीया इषिधः एषणीयाः पूर्वीर्बह्वीः इषो नाम निसो
४ मान् अन्नु पामग्निं विसृष्टः ॥ छ ॥ अथाष्टमी ॥ छ ॥ पुरु हि वामिति पुरुभुजो हे पूर्णभुजौ बहुपालकौ वां युवयोः देसं दातव्यं
धनं बहु हि भवति । अतः कारणात् नो अस्मभ्यं धेनुं शीणायित्रीं अमंक्तां मंत्रेभ्य त्रेअ मंक्तमणीं अमक्ताम मंक्तागामिति यास्कोनो
वाताइषिमन्नं पिन्वतं अयच्छतं यद्वा इषमेषणीयां धेनुं मिच्यर्थः । किंच वां स्तुतिः स्तुवंतीति स्तुतः स्तोतारः संतीमा धीमद यितारावर
श्विनो सुष्टुतिः शोभना स्तुतिः अस्तोऽस्तु भवति । रसाः सोमरसाः स्वसंति ये रसाः वां युवयोः रातिं दानं अन्नं हि अयत्र अगमं देवयज्ञं नेशा
ना । अयं भावः । सुष्टुतिं कृत्वा देवयज्ञं नेशानाः सोमसानूपीवात्सो हम्यः कामान् अयच्छतमिति शेषः ॥ छ ॥ अथ नवमी ॥ उत मत्सु द्वेइ
ति ॥ उत अपि चतुर्यं श्रुष्टुः गायकमस्त्वभूते सत्ये सम्युगमने रथी लिंगगामिनो वडवे मे अश्विनो स्तुतिं कुर्वतो मम अभूतां सुमीडहे
रश्मिविधमानाः शतं गावो मम माभूवन् । पुरुकेशः शिविघमानानि पक्वापक्वान्यन्नानि मम मासन् षोडश राज्ञा हिरणिनो हिरणिनो
हिरण्यवतः स्महूतीर्दीन् अश्वान् स्पर्शनो नू पुरुषान् रथान् स्वाचार दशदशसंख्याकान् वशासः अनुगुणाः अभिषाचः शत्रूणामभिभा राम
वुकान् सघ्यान् दर्शनीयान् दर्शनीयान् पुरुषान् अश्विनोः स्तोत्रमोषा नदद्दातु ॥ छ ॥ अथ दशमी ॥ संवां शतेति ॥ नासत्या हे अश्वि
नौ तां युवयोर्गिरे रणनीतिर्गीः स्तोत्रात् तस्मै अश्वानां शतानि सहस्रा सहस्राणि वरूपंथानाम राज्ञा मंदात संदद्दातिवीरहे ४

वीरावश्विनौ द्विवचनस्यलुक् गिरेयुवयोः स्तोत्रे भरद्वाजायमह्यं अधितुत्रिसंख्यातन्ददातु॥ किंचहे पुरुदंससा बहुकर्मणावश्वि
नौ युवयोस्तु ग्रहातरिस्तासिहताहतानिस्फः॥ छ॥ अथैकादशी॥ आवांसुम्नेइति॥ हेअश्विनौवरिमनविस्तृते सुम्नेवां
युवाभ्यांदत्ते सुखावहेधनेजनासःसुम्नमितिसुखनामसुपाठात् सूरिभिर्विद्वद्भिःपुत्रादिभिःसहआसमंतात्स्यामभवेयं
॥ छ॥ इतिपंचमस्यप्रथमेचतुर्थोवर्गः॥ छ॥ उदुश्रियइतिषड्‌र्चंदशमंसूक्तंभारद्वाजस्यार्षंत्रैष्टुभमुषोदेवताकं॥ अ
नुक्रम्यतेच। उदुश्रियेषलुषसंतुइति॥ प्रातरनुवाकेउषस्येक्रतौ त्रैष्टुभेछंदसिआश्विनशस्त्रेचैतदादिकेद्वेसूक्ते। सू
त्र्यतेहि उदुश्रियइतिसूक्तेइति॥ छ॥ तत्रप्रथमा॥ उदुश्रियइति॥ रोचमानादीप्यमानारुशंतःशुक्लावर्णारुशदितिवर्ण
नामेत्यास्कः। उषसःश्रियेनतःशोभायैजगद्यात्रुंवाअपामूर्मयोनउदकसंबंधिनस्तरंगाइवउदस्थुः। उत्तिष्ठंति। अनंतरं
मेकविविक्तगमः उषामहाःविश्वाविश्वानिस्छानानिसुपथासुमार्गाणिसुगानिसुखेनगम्यानिकृणोतिकरोति। अपिचम
घोनीधनवत्यरुषाःवस्त्वीशशताप्तादक्षिणाप्रमहईयित्रीचाभूता॥ छ॥ अथद्वितीया॥ भद्रादद्दृक्षइति॥ हेउषोदेवीभद्राक
ल्याणीददृक्षेदृश्यातेउर्वियाविस्तीर्णोचविभासितवशोचिःशोचिषःजसोलुक्दीप्यमानाभावोरश्मयःद्यामंतरिक्षं
उदपप्तन्उत्पातंतिं। किंचहेउषोदेवीमहोभिस्तेजोभिःशुंभमानाशोभमानारोचमानादीप्यमानावक्षःचदीयंरूपंआ

वे॰भा॰ विष्कृणुषे प्रकटीकरोषि॥छ॥ अथ तृतीया॥ वहंति सीमिति॥ अरुणासो लोहितवर्णाः रुशंतो दीप्यमाना गावः रश्म
५ यः किरणाः गाव इति रश्मिनामसु पाठात्॥ सुभगां दुर्वियाङ्वीं विस्तीर्णां श्यानां सीमेनां मुषो देवतां वहंति। सेयमुषो देवता
शूरः अस्तेव वीरः सेनेव वता मोपेजाते अपगमयति। वोल्हा मेना या अजिरेण क्षिप्रगामी शत्रून्निवतमोंसि बाधते च॥छ॥ अ
थ चतुर्थी॥ हे उषो देवि पर्वतेषु उत दुर्गेषु पि अवातेगमनसाधनरहितेदेशे सुपथानि मार्गाणि सुगाः सुगानि सुखेन गम्या
नि तेन वभवंति। स्वभानो हे स्वभाप्रकाशे अर्णोतरिक्षे आकाशं आपइत्यंतरिक्षनामसु पाठात्। सा मुहिकी रापोवातरसि।
ऋष्यु पयामन ऋष्युरथे अप्र्षे दर्शनीये दिवो दुहितः अंतरिक्षसुते हे उषो देवि सा त्वं इषयध्ये एषणीयं रयिं धनं नो स्मभ्यं आ
5 वह॥छ॥ अथ पंचमी॥ सावहयोक्ष्मिरिति॥ हे उषः सा त्वं वरं धनं मह्यमाह। या त्वं अवाता अप्रतिगता जोषं प्रतिअनुउक्ष
भिः अनडुद्भिः स्वैर्वा सोस्त्र्भ्यो वरं वहसि। किंच हे दिवो दुहितः अंतरिक्षसुते या त्वं देवी द्योतमाना पूर्वहूतौ प्रथमाह्वाने प्रातरनु
वाके मंहना पूजनीया वहसि। सा त्वं दर्शता दर्शनीया भूरितियोजना। यादर्शना भूरिः त्वन्त्वयेयहूते न सामानाधिकरण्यात् भूरि
त्व स्यानिर्वाननस्यात्॥छ॥ अथ षष्ठी॥ उत्तेवयश्चिदिति॥ हे उषो देवि ते तव व्युष्टौ सत्यां वयश्चित् पक्षिणोपि वसतेः निवासस्थ राम
नात् उत्पत्तन् उत्पतंति। ये पितुभाजो हविषा संभक्तारः अन्नस्य उपार्जका वा पितुरित्यन्ननामसु पाठात्। नरः ते पिचोत्पतंति। किंच हे ५

उषोदेवीत्वंअमासमीपेसतेवर्त्तमानायदाशुषेहविर्दात्रेमर्त्यायभूरिप्रभूतंवामंधनंवहसि॥छ॥इतिपंचमस्यप्रथमोपंचमो
वर्गः॥छ॥एषास्येतिषळर्चंचतुर्थंसूक्तंभरद्वाजर्षेस्त्रैष्टुभं॥अनुक्रम्यतेच॥एषास्येति॥उषस्यंत्विति पूर्वसूक्तउक्तत्वात्॥इदमप्यु
षोदेवताकंप्रातरनुवाकाश्विनशस्त्रयोरुक्तोविनियोगः॥छ॥तत्रप्रथमा॥एषास्यानइति॥एषास्यासावोनाःदिवोजाताअतए
वदुहितादिवःपुत्र्युषानोस्मदर्थंउच्छंतीतमांसिवर्जयंतीक्षितीःप्रजाःमानुषीरजीगःउद्गिरंतीजीगर्त्तिर्गिरतिकर्मावेतियास्कः
।अवाशयतीतियावत्।याऽरुशतादीप्यमानेनभानुनारुशतारम्यासुरात्रिषुरेफरकारयोर्व्यत्ययः।अक्तून्नैशान्यात्रादितेजोमित
मसश्चितमांसिचतिरस्तिरस्कुर्वतीअज्ञायिअदृश्यत॥छ॥अथद्वितीया॥वितद्ययुरिति॥चंद्ररथाःकांतिरथाःचंद्रश्चंदतेःकां
तिकर्मणइतियास्कः।ताउषसःतत्तदानींप्रातःकालेबृहतोबृंहणस्ययज्ञस्यअग्रंमुखंनयंतीःसंपादयंत्यःअरुणयुग्भिरुणवर्णयु
क्तैरश्वैःवियायुःविशेषेणयांतिचित्रंयथाभवतितथाभांतिचऊर्ध्वायाःरात्रेःअक्तुःकृष्णंतिरस्कृत्यनामसुपाठात्।तमोविबा
धंतेसम्यगपनयंतिच॥छ॥अथतृतीया॥श्रवोवाजमिति॥हेउषसःदाशुषेहविर्दात्रेमर्त्यायश्रवःकीर्तिंवाजंबलं
इषमन्नंऊर्जंरसंचवहंतीर्वहंत्योयूयंमर्त्योनीधनवत्यःप्रत्यमानागच्छतःअविधत्तेपरिचरतेमह्यंवीरवत्पुत्रपौत्रादि
सहितंश्रवोन्नंमिनंतश्चवेरत्ननामसुपाठात्।रत्नंधनंरत्नमितिधननामसुपाठात्।निधानमितरोमन्न॥छ॥अथ

वे॰ भा॰ चतुर्थी हेउषसः इदाहिइदानीमेववोयुष्माकंविधतेपरिचरते।दाशुषेरत्नंविधनमस्तिइदाहिइदानीमेववीरायप्रेरयध्वेइहविषांदाशु
६ षेयजमानायदाशुषेवोरत्नमस्ति।इदाहिइदानीमेवविप्रायप्राज्ञायजरित्रेदातुंवोरत्नमस्तियद्यस्मिन्विप्रेषुउच्छाउच्छानामकानिस्तोत्रा
णिविद्यंतेमाधवतेमघवतेमस्मत्सदृशायजमानायतदिदंरत्नंनिर्वहथपुराचित्पुरापिरत्नंमह्यंदत्तं॥छ॥अथपंचमी॥इदाहितइति॥हेउषसः अ
इस्मानोआदृतमानोततवशमादात्इदाहिमघएवगवांगोत्रामघान्वेअंगिरसोअरणेतिउस्रजंति।तथाचनिगमांतरं।गवांगोत्र
मुदसृजोयदंगिरइति॥अर्केणअर्चनीयेनब्रह्मणास्तोत्रेणबिभिदुःनभांसिविदारयंति।वान्रणांन्रणांनेतारोमेअंगिरसोदेव
हूतिर्देवविषयास्तुतिःसत्यासत्यफलाभवतु॥छ॥अथषष्ठी॥उच्छादिवइति॥हेदिवोदुहितःउषःप्रत्नवत्पुरातनेभ्यइवनोअस्म
दर्थंउच्छतमांसिवर्जयाहेमघोनि।भरद्वाजवद्विधतेपरिचरतेभारद्वाजवदितिवचनादन्योप्यस्तिभरद्वाजः।तथाचब्राह्मणं।प्राणो
वैभरद्वाजवदिति।गृणतेस्तुतिंकुर्वतेमह्यंसुवीरंकल्याणंपुत्रपौत्रादियुक्तंरयिंधनंदिशः।शाहिदेहेहिदिहिकिंच।नोअस्मभ्यंउरु
गायंबहुभिर्गीतंतथ्यंश्रवोन्नंअधिदेहिअधिकंप्रयच्छ॥इतिपंचमस्यप्रथमेषष्ठोवर्गः॥वपुर्न्वितिद्व्येकादशर्चंपंचमंसूक्तंभरद्वाज राम
स्यार्षंत्रैष्टुभंमारुतं॥तथाचानुक्रम्यते।वपुर्न्वेकादशमारुतमिति।व्यूल्हेदशरात्रेषष्ठर्श्चंपंचमंसूक्तंभरद्वाजस्यार्षंत्रिहन्या ६
ग्निमारुतेइदंसूक्तंमारुतनिविद्धानंसूत्रितंचहविष्मानंपुनुतादिति।वैश्वदेवेपर्वणिमारुतसप्तकपालस्यप्रचित्रकर्ममिति

याज्यायाश्चित्रमर्कं गृणते तेन वानुयाज्या। इति प्रकारद्वयेन मारुते पशौ ग्रचित्रमर्कं मिमीषे वयाज्या। सूचितं वा ग चित्रमर्कं गृणते
तुरायाय इदं वे हि वरमा अहे वेति॥ छ॥ तत्र प्रथमा॥ वपुर्नुतदिति॥ तस्मिन्निदं सानमेकरूपं मरुतः सर्वदा समानरूपाः। तथा च नि
गमांतरं। अन्ये ष्ठासो अकनिष्ठास एत इति। नाम स्थिराणामपि नाम करं धेनुं शीणापि दूप समानेनं सर्वदा गच्छत् वपुर्मरुतो चि
कितुषे लोके तु विष्णुं सत्तु। प्रादुर्भवतु। विदिति पुरकं। किं चातद्रूपं मर्त्येषु मर्त्यलोकेषु अन्यदोषधिवनस्पत्यादिकं दोमे कामा
दोग्धु पीपाय आप्याययति। किंच मरुतामेव निर्देशात् वृष्टिरंतरिक्षं समक्तमेव सरस्य वर्षा मुक्तं शुक्लवर्णमूधरुदकं
दुदुहे सरति॥ छ॥ अथ द्वितीया॥ अग्नयेत्र इति॥ ये मरुतः इध्मानाः अग्नयो न समिध्यमाना अग्नय इव शोभुच नदीप्यंते। यत्तये
मरुतः हिर्द्वि गुणं त्रि त्रिगुणं च वर्धंत इच्छानुरूपं वर्द्धंते संहितायां दीर्घः छांदसः। एषां मरुतां रथाः अरेणवो रेणुहिताः हिर
ण्ये सो हिरण्मयालंकारा अभवंति॥ ते भी मरुतः स्वम्नेः धनैः यो से भिर्बले साकं साहं भूवन्। प्रादुर्भवंति। तथा च निगमांतरं
॥य द्वषती भिसाष्टिमि रिति॥ छ॥ अथ तृतीया॥ रुद्रस्य इति॥ मरुतुषःसेरुः रुद्रस्य पुत्रा ये मरुतः संति। दाधृविः धरित्री ह
अिरंतरिक्षं यां आतु यां अमरुतो तुभरध्ये मर्तुं समा भवति। विदेहि सर्वज्ञातेहि महो महतामेषां मातापृश्निर्मही महती
॥किंच साप्टश्नि सुभ्वे नृणां सम्यक् भवनाय गर्भं सुदकं आदधनं आदधाति॥ छ॥ अथ चतुर्थी॥ न य ईषंत इति॥ ये स

वे·भा सिद्धीमरुतःजनुषोजन्मान्तलोन्नयुगतिअयाःअयनेगमन्तसाधनईषंतेनगच्छंति।किंतेषांरत्नणायत्नामावाहमनाभावः
७ ।नेत्याहअंतःसंतःसर्वेषांइहदिवंतेमानाएवअवधानिपापानिपुनानाःशोधयंतः।।यथावनिगमांतरांप्राणावैमरुतःस्वा
पयइति।अंतःसर्वप्राणिनाइहदिवर्तमानत्वात्तेषांगमनेनास्तिअध्यात्मेप्राणरूपेणावस्थानंदर्शितंभवतिशीघ्रगा
मित्वंतुनामधिदैवतरूपेणेतिद्रष्टव्यं।यद्यःहास्तुचयोयमानामरुतःजोषमनुलोरत्णंकाममनुनिदुहेनिवरांइहंस्फ
रकांतयाश्रियादीप्यमानाअनुअनुगतास्तेत्वंआमीयंशरीरंप्रकाशयंतःउत्तमाणाःभूमिंमिंचंतोभवंति।यद्वात्वंत्वे
विस्तीर्णयथाउत्तमाणाभूमिसिंचंतोभवंतीत्यर्थः।।छ।।अथपंचमी।।मत्वानयेष्टिजि।।येष्वश्मिईष्वस्सुधच्छ
धर्षकंमारुतंनाममरुसंज्ञकंशर्धंदधानाःउचारयंतःअयाःउगपच्छंतःस्तोतारःमस्तुहिपिंदोहमेकामानांदोहंस्तु
हामाभवेतिननेतिसंप्रत्यर्थेस्तेनामिरोहितावासोदधनामपहर्नारःअयासोगंतारोभवंतिमेक्रामहत्वेनयुक्ताश्चभवंतिएव
ग्रामृतानकुह्यानमूहानुःशोमनाहविर्दानोव्ययजमानःअवयासततमवयजतेअपगतक्रोधान्करोतिनेतिसंप्रत्येवं।।छ।।
इतिपंचमस्यप्रथमेसप्तमोवर्गः।।छ।।अथषष्ठी।।तरुंदुयोदति तेमरुतःउयाःशवसाबलेनवेगेनयुक्ताःस्वक्षणेणाधर्षक राम
सेनाःसुमेकेसुरूपेउभेरोदसीद्यावापृथिवीयोयुजंतेयोजयंतिदृष्ट्यापृथिवीतर्पयंतीत्यभिप्रायः।अधस्मएषाअपिचयेषुम ७

रुसुरोदसीरुद्दसपत्नीअद्धाग्निकीवाकुस्यशोचिस्वहीन्निर्वर्त्ततेआअस्यवसुबलवसुतेषुरोकोदीन्निर्बाधकोवानातस्थे
नतिष्ठन्निनंनिःसरत्येवेत्यर्थः॥ छ॥ अथसप्तमी॥ अनेनोनेवहति॥ हेमरुतः वोयुस्माकंसंबंधीयामोरथः अनेनःपापरहि
तंयथाभवति। तथा अस्तु प्रादुर्भवतु। किंचयंयामंअरथीः रथिः सारथिः नरथिनः अराथीः अप्ता रथिरपिस्तोता अजतिसे
रतिमयामः अनस्वःअपितत् अश्वरहितोपि अनवसःपथ्यद्दनरदितः अनभीसुःपाशइस्तिरोरजसूः उदकस्यप्रेरकः साधक
स्लोचृणांकामानृमायन्नरोदसीयावापृथिव्योपयांपथैं। नास्त्रिमार्गात्रुवियाविविविधंगछन्॥ छ॥ अथाष्टमी॥ नास्य
वर्त्तेति॥ हेमरुतः वाजसातौसंग्रामेयंवमवथरहे थ अस्यजनस्यवर्त्तासेरकोनास्ति अस्यनरुतानुहिंसितावनास्ति अ य अ
पिवतोकेपुत्रंतनयेधनेवागोष्ववाअस्सुवानिमितंभूतेश्रुमवथः पार्येसंग्रामेघोः हीन्नअस्यास्यविजिगीषेबोश
चोः व्रजंगवांसंबंद्धर्त्तारारयिताभवति॥ छ॥ अथनवमी॥ प्रचित्रमिषं हे अग्नेएनतेशर्द्धकुर्वातेस्तूयमानायवान्नुर
यवाधितायस्वतवसेस्वभूतबलायमारुतायमरुतांगणायचित्रंदर्शनीयंअर्कंअन्नंहविःस्वधा अर्कईल्यन्ननाम
सुपाठात्प्रभरधंवसहायभूतान्विनः वंवसर्वेयूयंभरत। यथालोकेवहुष्वेककार्यकरसुमुख्यमेकंसंबोध्ययू
यमेवकुरुतेतिप्रार्थना। लहदन्नाचिमुख्यमग्निमेकमेवसंबोध्यभरथमितिवहुवचनप्रयोगः। येमरुतः सहांसिशत्रूणांबलानिम

वे·भा हसा बलेन सहंते ऽभिभवंति । सुखेभ्यो मंहनीयेभ्यो मरुद्भ्यो भयात् पृथिवी रेजते कंपते । मारुतायेति तद्धितवत्सावं न भूतानाम
पि मरुतां बुद्ध्या गतिमागात् इयं इति गच्यवमर्शः । यथा महाभाष्ये । अथ शब्दानुशासनं केषां शब्दमिति । यथा वा लोके राज्ञः पु
८ रुष इत्युक्ते कस्य राज्ञ इति ॥ छ ॥ अथ दशमी ॥ त्विषीमंत इति ॥ मरुतः अध्वरस्येव यज्ञस्येव दिद्युत् द्योतमानाः तृषुच्यवसः क्षिप्रगनाः
अग्नेः जुह्वो न रश्मय इव त्विषीमंतो दीप्तिमंतः अर्चत्रयो ऽर्चनीयाः धुनयो नमपभान कंपयंत इव वीराः भ्राजज्जन्मानः दीप्तशरीराः अधृष्टाः
8 परैरनभिभूताश्च भवंति ॥ छ ॥ अथैकादशी ॥ तं वृधंतमिति ॥ तं सिंहं वृधंतं वर्द्धमानं वाजदृष्टिं भ्राजमानं स्वर्षिं रुद्रस्य सूनुं पुत्रं मा
रुतं मारुतं मरुतां गणं हवसा स्तोत्रेण आ विवासे परिचरामि । किंचद्दिवः स्तोतुः शुचयो निर्मलाः मनीषाः स्तुतयः उग्राः उद्गूर्णाः शहीय मारु
ताय बलाय ऋक्षः शर्द्ध इति बलनामसु पाठात् । अपः अ ऋवंतः गिरयो न मेघा इव गिरिः व्रज इति मेघनामसु पाठात् । अस्पृध्रन् अस्पर्द्धंते ॥
॥ छ ॥ इति पंचमस्य प्रथमे ऽष्टमो वर्गः ॥ छ ॥ विश्वेषां व इत्येकादशर्चं षष्ठं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभं मैत्रावरुणं । तथा चानुक्रम्यते वि
श्वेषां मैत्रावरुणमिति ॥ सूक्तविनियोगो लैंगिकः मैत्रावरुणे पशौ आयातं मित्रावरुणां तथा चानुक्रम्यते ॥ विश्वेषां मैत्रावरुणमिति
॥ सूक्तविनियोगो लैंगिकः मैत्रावरुणे पशौ आयातं मित्रावरुणेति पशुपुरोडाशस्यानुवाक्या । सूत्रितं च । आयातं मित्रावरुणा सुशस्ति राम
नो मित्रावरुणा हव्यजुष्टिमिति । व्यूढे दशरात्रे सप्तमे ऽहनि प्रउगशस्त्रेषु अयं द्वामिति मैत्रावरुणं तृतीयं तृचं । तथा च सूत्रितं । अयं द्वां मित्राव ८
रुणा सूद इन्द्रा गोमता नासत्या रथेनेति ॥ छ ॥ तत्र प्रथमा विश्वेषां व इति ॥ विश्वेषां सर्वेषां मध्ये ज्येष्ठतमा ज्येष्ठतमौ मित्रावरुणौ वो वां

गिर्भिः स्तुतिभिः वर्द्धध्यै वर्द्धयितुं भवतो स्मि ॥ यायो र्हीडौ महितौ अस्ममा विषमौ त्रिरश्रिं हंति चतुरश्रिरुग्र इति निगमांतरेणाम
र्थ्यं दर्शितं । यमिष्टायं रतमौ स्वैरात्मीयैर्बाहुभिः रश्वीव रश्मिनेव अश्वान् जनान् संयमतुः संगच्छतः बाहुभिरिति बहुवचनं पूजार्थं
॥ छ ॥ अथ द्वितीया इयं मद्वा मिति ॥ हे मित्रावरुणौ वां युवां मतं मम मद्इयं मनीषा स्तुतिः प्रस्तरणीते प्र छाद्यति प्रियाहे प्रियौ युवां
नमसा अन्नेन हविषा सहोपगच्छति च । युवयोर्वर्हिः यज्ञम् अच्छति च हे मित्रावरुणौ नो अस्मभ्यं अधृष्टं अनभिभूतं छर्दिर्गृहं यंतं प्रयच्छं
तं । हे सूहानू शोभनदानौ वां युवयोः संबंधं युवाभ्यां देयं यद्गृहं वरूथ्यं शीतवातातपानां वारयितृ भवति ॥ छ ॥ अथ तृतीया ॥ आयातमि
ति ॥ हे मित्रावरुणौ सुशस्ति शोभनशंसनं नमसा अन्नेन हविषा स्तोत्रेण वाहूयमानौ स्तूयमानौ वा प्रियस्य प्रियौ उपायातं उपागच्छतं । या
यौ महित्वेन त्वक्षौ युवां ऋधीयतः ऋधिमंतं यशो वा आत्मन इच्छतो जनान् अप्नः स्तुत्कर्मणः पर्धिरूत पुरुषः अप्नः अप्न इति कर्मनामसु
पाठात् ॥ अपसे व कर्मणे व संयत यः संयच्छथः ॥ छ ॥ अथ चतुर्थी ॥ अश्वानयेति ॥ यायो अश्वान अश्वा विव वा जिना वा जिनौ बलिनौ
पूतबंधू पूतस्तोत्रौ अस्तौ नामस यौ वयतयो गर्भं गार्भभूतौ अदितिर्देवी भरध्यै बभार । किंच या । यो जायमाना वेव महिमस्तेहतौ महांता महत्त्व
ते प्रभूतौ तौ मित्रावरुणौ मर्त्याय मर्त्याय रिपवे हिंसकाय वोरी घातकौ निद्रीधः निरधात् अदितिः स्वो दरे ॥ छ ॥ अथ पंचमी ॥ विश्वे
यद्वा मिति ॥ विश्वे सर्वे देवासो देवाः सजोषाः परस्परं गतियुक्ताः यत् यौ वां युवां मंहना महत्त्वेन मंदमानाः स्तुवंतः सत्रं बलम् अख्यः धत्त

वे·भा वंतः। किंच यत् यो युवां उर्वी विस्तीर्णे रोदसी द्यावापृथिव्यौ परि भवथः। तयोर्युवयोः अद्द्यासः अहिंसिताः अमूराः अमू
९ ढाः स्पशः रश्मयः अरावा संति ॥ छ ॥ इति पंचमस्य प्रथमे नवमो वर्गः ॥ छ ॥ अथ षष्ठी ॥ ता हि क्षत्रमिति ॥ तातो मित्रावरु
णौ युवां अनुद्यून् दिवसे दिवसे क्षत्रं बलं धारयेथे हि द्यौः अंतरिक्षस्य सानु समुच्छ्रितं प्रदेशं मे वं सूर्यं वा दृंहे येदृढीकुरुत उ
पमा दिव उपमीयते अग्निः यतद्ध्युपमानस्छूणां साय थाव संधारयंति तद्वदित्यर्थः ॥ छ ॥ दृल्हः युवाभ्यां दृढीकृत स्वमेना
नक्षत्रं अंतरिक्षं व्याक्रवानः उत अपि च विश्वदेवः सूर्यो भूमिं द्यां दिवं च आ यो मनुष्यस्य। इद्यवः आयव इति मनुष्यनामसु
१ पाठात् धमिना अन्नेन हविषा सुतद्धमनीत्यन्ननामसु पाठात् आप्यायितः सन् आ अतनोत् आतनोति युवाभ्यां दृढीकृतं एव
॥ छ ॥ अथ सप्तमी ॥ ता विग्रं धैथे इति ॥ तातो मित्रावरुणौ युवां विग्रं प्राज्ञं यजमानं विप्रः विग्र इति मेधाविनामसु पाठात् धै
थे धारयथः जठरमुदरं पृणध्यै सोमेन पूरयितुं यद्यहा सप्रभृतयः सह म्रियमाणा अविजसः मक्षय ज्ञसद्रनं आ पृणंति आ
पूरयंति विश्वजिन्वा विश्वजिन्वा नौ यद्यहा पयो जलं भवद्भ्यो ग्रहितं न द्यावु वनयो न द्योः दिशो वा नमृष्यंते क्षसाना नि भूयंते
अवाताः अशुष्काः विमर्दंते विभूतिं धारयंति ॥ छ ॥ अथाष्टमी ॥ ता जिह्वयेति ॥ तातो मित्रावरुणौ युवां सुमेधसः ज्ञः जिह्वया वा राम
चा मरः सर्वदा इहनं अलं आयाचते आ इत्युपसर्गः दना ॥ द्याम्प ज्ञिया ध्याहारः घाचत इत्यध्याह्रियते। पूर्वस्या मृविजलस्याग कृतवान् ९

वृद्धो विपरिवर्त्तमानं इदमशब्देन परामृश्यते॥ यद्यद्वा वां युवयोररतिरभिगन्ता सते यज्ञे सद्यो मायारहितश्चाभूत् स्याभवति॥ हे द्युतानौ
तस्मा हितम पेक्षितमद्य इहवलस्तोत्रं वा युवयोरस्तु॥ किंच युवं युवां ह्वाशुषो यजमानाः स्पषष्ठ्यार्थे चतुर्थी॥ अंहः पापं विचर्षणिष्ठं वि
नाशयतमिति॥७॥ अथ नवमी॥ अयद्वामिति॥ हे मित्रावरुणौ वां युवयोः प्रियाणि धामधामानि कर्माणि युवधीतानि युवाभ्यां वि
हितानि यतये यजनः स्पृहयन्तः सर्द्दमानाः प्रमिनन्ति हिंसन्ति ये च देवाः सोदेवाः ऋहसा वहनसाधनेन स्तोत्रेण युक्ताः ते वैव च अयः अपः कर्मतं
ईतः अथ ऋसाव यज्ञे उरुक्रान्तः पृथाकर्माणि कुर्वन्तीत्यर्थः॥ ये च न युवाः प्रणन्तीतियुवाः न युवाः अप्रणन्त इत्यर्थः॥ तान् सर्वान् विचर्षणिष्ठ
मिति अनुषज्यते॥७॥ अथ दशमी॥ प्रियद्वा च मिति॥ यद्यदा कीस्तासो मेधाविन ऋतावान् उशिजः कीस्तास इमे अविनाम सुपाठा
ता वावेद्युर्मिं विभरन्ते इत्युक्तवन्तः तत्र केचिद्धृताः मनानाः अप्रतिहीना वंतः निविदः शंसन्ति॥ आत तथा सति वां युवाभ्यां म्यन्यं पृ
च्छानि स्तोत्राणि वयं ब्रवाम महित्वा महत्वेन देवेभिरन्यैर्देवैः सह न किं पतयथ्न्ना गच्छथः॥७॥ अथैकादशी॥ अवो रित्थावामिति॥
हे मित्रावरुणौ अवो अवतो वां युवयोरभिष्टो अभिगमने छर्दिषः गृहाय सुखाय वा चतुर्थ्यर्थे षष्ठी एवाम भिगते युक्तो इषुयुवोः सु
वसुव भागं देवयन्त गृहादिकं अहृधा युक्त अविच्छिन्नं भवति॥ तथा च यास्कः॥ अहृधा युरहृताध्यायुः कृधितिर्हस्वनाम नहृतं भ
वतीति॥ इत्थास त्येमेव कहाम्मित्रावरुणयोरभिगमनं इत्पत आह॥ यद्यद्वा गावब्धुनयः अनुस्फुरान् अनुसुरस्युः यदा च सवि यं सन्तु

वे·भा गामिनं धस्नुं शत्रूणां धर्षकं वृषणं कामानां वर्षितारं सोमं रक्षो रमणो व्यस्नेतुनजनयन्नमानायुं ज्यः ॥ छ ॥ इति पंचमस्य प्रथमे
१० दशमो वर्गः ॥ छ ॥ श्रुष्टी वामित्येकादशर्चं सप्तमं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैंद्रावरुणं तथा चानुक्रम्यते ॥ श्रुष्टी वा मैत्रावरुणमु
पांत्यें जगत्याविमित्येकादशर्चं सप्तमं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैंद्रावरुणं तथा चानुक्रम्यते ॥ श्रुष्टी नामैत्रावरुणमुपांत्यें जग
त्याविति । प्रसंम्राजे इंद्रावरुणा सुतपाविमित्येते जगत्यौ शिष्टास्त्रिष्टुभः इंद्रावरुणौ देवता ॥ आभिप्लविकेषूक्थ्येषु तृतीसवने
होत्रकशस्त्रेषु स्तोमवृद्धौ मैत्रावरुणस्येदमेवावापार्थं सूक्तं । सूत्रितं च । श्रुष्टी वां यज्ञो युवां नरेति । तृतीयसवने इंद्रावरुणा सुत
पाविमं सुतमिति प्रशास्तुः प्रस्थितयाज्या । सूत्रितं च । इंद्रावरुणा सुतपाविमं सुतमिंद्रश्च सोमं पिबतं बृहस्पत इति । उक्थे तृ
तीयसवने इंद्रावरुणा मधुमत्तमस्येति मैत्रावरुणस्य शस्त्रयाज्या । सूत्रितं च । इंद्रावरुणा मधुमत्तमस्येति याज्येति ॥
छ ॥ तत्र प्रथमा ॥ श्रुष्टी वामिति ॥ महामंहनीयौ हे इंद्रावरुणौ वां युवयोरर्थे श्रुष्टी क्षिप्रः तथा च यास्कः ॥ श्रुष्टीति क्षि
प्रनामाश्रुष्टीति । यज्ञः सोमः सजोषाः नृभिः सहितः अयमासमंतात् उद्यतः अध्वर्युभिः सोमः मनुष्वत् मनोरिव वृक्तब राम
र्हिषः स्तीर्णबर्हिषो यजमानस्य इषे अन्नार्थं महे महते सुम्नाय सुखाय च यजध्यै यष्टुं वा गाववर्त्तत् आवर्त्तयति ॥ छ ॥ अथ १०
द्वितीया ॥ ता हि श्रेष्ठेति । हे इंद्रावरुणौ तौ तौ प्रसिद्धौ युवां श्रेष्ठौ देववाता देववातौ यज्ञे ईष्टिर्देवतातेति यज्ञनामसु पाठात्

तुग्राधनानां प्रेरकौ दिभूतं भवतं। किं च तौ हि युवां शूराणां मध्ये शविष्ठा अतिशयेन बलवंतौ भूतं किं च मेघोनां दानवतां किं
च मंहिष्ठा दातृतमौ तु विभूष्णा बहुबलौ असतेन सत्यमेतत् च तुराशत्रूणां हिंसकौ सर्वसेना सर्वसेनौ च भूतमिति॥ ७॥ अथ
तृतीया॥ वाम् रणीहीति॥ हे भरद्वाज नमोभिः स्तुत्यैः अषैः बलैः अषमिति बलनाम सुपाठात् सुम्नेभिः सुखैः सर्वैः अकाना स्तु
तौ कावतिः शष्ट कर्मा तस्य इकान विरूपमिदं तौ इंद्रावरुणौ गृणीहि स्तुहि अन्यः तयोः अन्य इंद्रः वज्रेण नाम कसुरं वृत्रं
एणहंति अन्यो वरुणः विप्रः आत्कः वृजनेषु स्तोतॄणां मुपद्रवेषु रक्षितुं शवसा बलेन मिषन्ति संगच्छते छ अथ चतुर्थी॥ ग्ना
श्च यद्धिति॥ नरः नराणां मनुष्याणां मध्ये ग्ना श्च वित्र श्च मेना। ग्ना इति स्त्रीणामिति यास्कवचनात्। नरः श्च पुरुषा श्च विश्वे सर्वे
देवाः स्तारः देवा मह इत्यत्र सुमो हि येत्येकशेषात् देव्य श्च देवा श्च देवा मह इति निर्देशाः पुंवन्निर्देशाः। स्वतूर्तिः स्वयमुद्यताः य
घ हावद्वधंता स्तुतिभिर्वर्द्धयंते नदा हे इंद्रावरुणौ महि वा महत्त्व स्तुक्तो एभ्यः स्तोतृभ्यः प्रभूतं भवतं हे द्यौः पृथिवि च उर्वि
वी विस्तीर्णे युवां एभ्यः प्रभूतमित्यनुषंगः॥ अथ पंचमी॥ म इत्सुदानुरिति॥ हे इंद्रा इंद्रा वरुणा इंद्रावरुणौ इतरेतरयोगाद्दु
भयत्र द्विवचनं गयोगः। वरुणो यत्र संहिताया ह्रस्व छांदसः। वां युवयोः यजमानः मन् आत्मनेव दाशति हवींषि ददाति। म इत्
स एव सुदानुः शोभनदानो भवति। स्व वा नूधनवां श्च अन्नवां श्च भवति। किं च मवा स्मान् नरान् वान् द्विषो हे स्पृध अन्नेन जयलेवे

वे॰भा नमहतारेतस्मायेन। अपिचरयिंधनं रयिवतो धनवतोजनानुस्तुत्रां स्वसंमतमंमजेन॥छ॥इतिपंचमस्यप्रथमे एकादशोवर्गः
११ ॥छ॥ अथषष्ठी॥ यंयुवमिति॥ देवादेवौ स्तूयमानौ इंद्रावरुणौ युवं युवां दास्वध्वराय दत्तहविष्काय वसुमंतं धनानुबधिरंयु
रुत्नुं बहुत्नं पुरुमेयशस्कं वायं यादृशं रयिं धनं धत्थः प्रयच्छथः। योपिवनुषांहिंसकानां अशस्तीः अकीर्तीः शत्रून्हंतान्य
यशांसीत्यर्थः। प्रभनक्ति प्ररुजति। मतादृशोरयिः अस्मे अस्मासु स्यातभूयात्॥छ॥अथसप्तमी॥ उतनःसुत्रात्रइति॥ उ
तापिचइंद्रावरुणाहेइंद्रावरुणौ भूरिभिःस्तोतृभ्यः नोस्मभ्यंसुत्रात्रःसुरक्षः देवगोपाः देवागोपायितारो यस्यसतथाविधः रयिर्ध
नं स्यात्भूयात्। किंचयेषामस्माकं शुष्मो बलं पृतनासु युद्धेषु साह्वान् शत्रूणामभिभविता नतुरिः हिंसकः स्वसनघञ्ना
यशांसिसघएवप्रतिरतेसम्यक्तिरस्कयात्॥छ॥अथाष्टमी॥ नूनइंद्रावरुणेति॥ हेइंद्रावरुणा इंद्रावरुणौ गृणाना स्तू
यमानौ युवां नोस्मभ्यं सौश्रवसायसुश्रवसो भावः सौश्रवसं तास्मे सुश्रवसाय स्तुत्याय रयिंधनं नु क्षिप्रं प्रकं यच्छतं। किंचदे
वहे। देवौमहिन्तस्यमहतो युवयोः शर्ध्रा बलेरद्धा इठगृणंतः स्तुवंतो वयंदुरिता निनावाअपोनगुहकानीवतरेन॥छ॥अथ
नवमी॥ प्रसम्राजेइति॥ हेस्तुतः से सं स्तोतः संम्राजे प्रपाराशासमकायबृहते परिदृढाय देवाय द्योतमानाय वरुणाय प्रियंम राम
नोहरं सप्रथः सर्वतः पृथु। तया चया स्कः सप्रथाः सर्वतः पृथुरिति। मन्मस्तोत्रं नु अर्घ्य भार्गमो वा रय अयंयन्योःस्वंवरुणःम ११

हिनामहिम्नायुक्तःमहित्वतोमहाकर्माकव्यामसयाचयुक्तःअजरोनजरारहितःसउर्वीविस्तीर्णेद्यावापृथिव्योशोचिषा
दीप्त्याविभातिविभासयति॥छ॥अथदशमी॥इंद्रावरुणेति॥इंद्रावरुणाहेइंद्रावरुणौसुतपौसुतस्यसोमस्यपातारौयु
वांमदंमदकरंसुतमभिषुतमिमंसोमंपिबतं।किंचधृतव्रताहेधृतकर्माणौयुवोर्युवयोःरथःअध्वरमुद्दिश्यदेववीतयेदे
वानांपानार्थंपीतयेयुवयोरपिसोमपानार्थंस्वसरंमार्गंप्रत्युपयाति॥छ॥अथैकादशी॥इंद्रावरुणेति॥इंद्रावरुणाहे
इंद्रावरुणौवृषणाकामानांवर्षितारौयुवांमधुमत्तमस्यअतिशयेनरसवंतंवृष्णोवर्षितारंसोमस्यसोमंआवृषेथांअश्री
तेनतथाचशतपथब्राह्मणंयथाभागमावृषाथामितियथाभागमश्नीतेत्येवेतदाहेति।वांयुवयोरर्थेइदमंधःसोमरूप
मंत्रंअस्मेअस्माभिःपरिषिक्तंपात्रेषुअंतःआसद्योपविश्यास्मिन्बर्हिषियज्ञेमादयेथांसोमपानेनेतिशेषः॥छ॥इतिपंचम
स्यप्रथमेद्वादशोवर्गः॥छ॥संवांकर्मणेत्यष्टर्चमष्टमंसूक्तंभरद्वाजस्यार्षंत्रै ष्टुभमैंद्रावैष्णवं॥अनुक्रम्यते॥सं
वामष्टावैंद्रावैष्णवमिति॥उक्थ्येतृतीयसवनेच्छावाकशस्त्रएतत्सूक्तंसूत्र्यतेहिसंवांकर्मणेंद्राविष्णूमदपतीमदानामितिया
ज्येति॥सोमातिरेकेप्रातःसवनेनिमित्तिकेशस्त्रेपरिहितेसतिगाणगानिमतिसंवामितितस्यशस्त्रयाज्यासूत्रितंच॥इंद्रा
वैरुणअभ्यावेतिगाणगारेर्दैवतप्रधानत्वात्संवांकर्मणासमिषाहिनोमीतिसोमातिरेकेमाध्यंदिनसवनेतियाविष्वासा

मित्येषाशस्त्रयाज्यासूचितंच॥याविश्वासांजनितारामतीनामितियाज्येति॥उक्थ्येतृतीयसवनेछावाकस्येंद्राविष्णूमदतीइति
शस्त्रयाज्यासूत्रंद्रष्टव्यं॥तृतीयसवनेछावाकस्येंद्राविष्णूपिबतमितिशस्त्रयाज्यासूचितंच॥इंद्राविष्णूपिबतंमध्वोअ
स्यसोमंस्तोममर्हतिजातवेदसइति॥छ॥तत्रप्रथमा॥संवांकर्मणेति॥हेइंद्राविष्णूवांयुवांकर्मणास्तोत्रेणइषहे।विषा
चसंहितोमिसन्पक।परयामिअपसःअस्यउक्थस्यपारेसमाप्तौयसनुषेथामेषां॥किंचअरिष्टेरहुपइवैःपथिभिर्मार्गैः
नोस्मान्नपारयंतापारनयंतौयुवांद्रविणंधनंधनमस्मभ्यंदत्तं॥छ॥अथद्वितीया॥याविश्वासामिति॥यायोअग्निहाविंद्र
विष्णूविश्वासांसर्वासांमतीनांस्तुतीनांजनितारा।जनितारौ।जनजननइत्यस्माद्धातोस्तृचीदंरूपं।यद्वाजनीप्रादुर्भावइत्य
स्मादेवधातोस्तृचीजनितामंत्रेइतिनिपातना लोपः।कलशाकलशोसोमधानासोमस्यविधानभूतौचमसावां।अथप्र
त्यस्तुतिः।हेइंद्राविष्णूवांयुवांमस्यमानाउच्चार्यमाणाशस्त्ररूपाःगिरोवाचःयावंतुप्राकृवेतुअर्कैःस्तोतृभिःगीयमानाःस
गीयमानाःस्तोमासःस्तोमाःस्तोत्राणिचयावंतुप्राप्नुवंतु॥छ॥अथतृतीया॥इंद्राविष्णूमदपतीइति॥हेइंद्राविष्णूमदा
नांसोमानांमदपतीस्वामिनोमदपतीइत्यत्रद्वेपदेशसेनुवाद्य।द्रविणोद्रविणसान्धनानांप्रापियद्रविणाउइतिपदद्वयमेकीभू राम
यद्रविणोइतिनिष्पन्नंपदं॥धनादेशेनोयुवांसोमममभीआयातंमतीनांस्तोत्रणांस्तोमासःस्तोत्राणिउक्थैःशस्त्रैःसाईश १२

12

स्पमानासः उच्चार्यमाणाः वां युवां अक्रुध्निः स्तेनोनिः संसमं जंतु समर्द्ध्यंतु। संसमिति द्विरुक्तिरादरार्था॥ छ॥ अथ
चतुर्थी॥ आवामश्वासइति हे इंद्राविष्णू वां युवां अभिमातिषाहः अभिमातीनां हिंसकानां अभिभवितारः सधमादः
सहमादं तः अश्वासो श्वाः आवहंतु। मतीनां स्तोतृणां विश्वा विश्वानि सर्वाणि हवना हवनानि स्तोत्राणि जुषेथां सेवेथां
तदर्थं मे मदीयानि ब्रह्माणि स्तोत्राणि गिरः शस्त्ररूपा वाचश्च उपशृणुतं॥ छ॥ अथ पंचमी॥ इंद्राविष्णू तदिति। हे इंद्रा
विष्णू वां युवयोः तत्कर्म पनयाय्यं स्तुत्यं किं तत्कर्मेत्यत आह। सोमस्य मदे सति यदुरु विस्तीर्णं चक्रमार्थे। यद्यपि वि
स्तीर्णं विक्रमः तथाप्येकार्थत्वादुभयोरित्युच्यते। यच्चांतरिक्षं वरीयः उरुतरं अकृणुतं अकुरुतं। यदपि च रजांसि लो
कान् सर्वान् लोका रजांस्युच्यंत इति यास्कः। नोस्माकं जीवनाय अप्रथतं अप्रथयतं॥ छ॥ अथ षष्ठी॥ इंद्राविष्णू ह
विषेति॥ घृतासुती हे घृतान्नाविंद्राविष्णू युवां हविषा सोमेन वावृधाना वर्द्धमानौ अग्राद्वाना सोमाग्रस्य भुक्
स्पात्तारौ नमसा नमस्कारेण रातहव्या दत्तहविष्कौ यजमाने अस्मे अस्मभ्यं द्रविणं धनं धत्तं प्रयच्छतं किं च युवां समुद्रः
उदधिरिव स्थो भवथः यतः सोमधानः सोमाः निधानः सोमनिधानः कलशो भवथः॥ छ॥ अथ सप्तमी॥ इंद्रा
विष्णू पिबतमिति॥ हे दस्रा हे दर्शनीयौ विंद्राविष्णू युवां मदिराणि मदकराणि अंधांसि सोमात्मकान्यन्नानि अ

वे·भा· मिगच्छतं॥इमेममदीयानिब्रह्माणिस्तोत्राणिहवंमदीयमाह्वानंचोपशृणुतं॥छ॥अष्टमी॥उभाजिग्यथुरि
१३ ति हेइंद्राविष्णूउभाउभौयुवांजिग्यथुःशत्रून्जयथःनपराजयेथेनपुनःकदाचनपराजायेथे॥एवोरेनयोर्युवयो
मध्येकतरश्चनएकतरोपिनपराजिग्येनपराजैष्टहेविष्णोइंद्रश्चत्वंचयुवांयदुतयदसुभ्यपस्पृधेथांअसुरैःसहास्प
धेथां॥त्रेधालोकवेदवागात्मनात्रिधास्थितंसहस्रममितंचतदैरयेथांव्यक्रमेथामित्यर्थः॥तथाचब्राह्मणं॥
उभाजिग्यथुरित्यच्छावाकस्योभौहितौजिग्यथुर्नपराजयेथे।नपराजिग्यइतिनहिलयोःकतरश्चनपराजिग्ये
इंद्रश्चविष्णोःयदपस्पृधेथांत्रेधासहस्रंवितदैरयेथामिति।इंद्रश्चहवैविष्णुश्चासुरैर्युयुधातेस्त्रिर्विक्रमतेता
वदस्माकमथयुष्माकमितरदितिसइमांल्लोकान्विचक्रमेथोवेदानथोवाचंतदाहुःकिंसहस्रमितीमेलोका
13 इमेवेदाअथोवागितिब्रूयादैरयेथांमैरयेथामितियद्वातत्सहस्रंगवांसहस्रंत्रेधाव्यैरयथामित्यर्थः॥छ॥इ
पंचमस्यषष्ठप्रथमत्रयोदशोवर्गः॥७॥घृतवतीभुवनानामितिषल्ऋचंनवमंसूक्तंभरद्वाजस्यार्षंजागतंद्यावापृ
थिवीदेवताकं।तथाचानुक्रम्यते।घृतवतीषड्द्यावापृथिवीयंजागतमिति॥आभिप्लविकेपंचमेहनिवैश्वदेवश राम
शस्त्रस्त्वचोद्यावापृथिवीयंनिविद्धानार्थं।सूत्रितंच।घृतवतीभुवनानामभिश्रियोर्इस्तुभिर्वाजवड्भिरितिमर १२

वावितिबृहस्पतिसर्वेपिवैश्वदेवशस्त्रएकस्तृचःसूत्रितश्चाभिप्लविकेतृतीयेहनिवैश्वदेवशस्त्रेघृतेनद्यावापृथि
वीइतितिस्रोद्यावापृथिव्याइतिविज्ञानार्थंसूत्रितंच॥घृतेनद्यावापृथिवीइतितिस्रोनस्त्वोजातइति॥छ॥तत्रप्र
थमा॥घृतवतीइति॥द्यावापृथिवीद्यावापृथिव्यौघृतवतीदीप्तिमान्तोउदकवत्योवा।वनंश्यतमित्युदकना
मसुपाठात्भवतइतिशेषः।भुवनानांभूतानामभिश्रियाआश्रयणीयेनभवतइतिसर्वत्रानुसंबोधेयं।उर्वी
विस्तीर्णेपृथ्वी।बहुकार्यरूपेणप्रथितेचमधुदुघेमधुनउदकस्यदोग्ध्र्यो।सुपेशसासुरूपेवरूपेणस्यसर्वस्यनि
यामकस्यधर्मणोधारणेनविष्कभितेपृथ्व्यजरेनितेअभूरिरेतसाबकुरेतस्केबहुकार्येवाभवतः।अत्र
सामस्त्यात्द्यावापृथिव्योःस्तुतिप्रसंगात्प्रणस्योग्निरपृष्ठ्यं॥छ॥अथद्वितीया॥असश्चन्तीइति॥असश्चंतीअ
सज्यमानेसुदुहंसमानेवाभूरिधारेबहुधारेद्विधौवापृथिव्योधाराःपृथिव्यांआघ्राद्रुतरसधाराःएवमुभयोरपिबहुधा
रवंपयस्वतीउदकवत्योवातोवाभूरिधारत्रेनयावयात्स्ऋ॥असज्यमानेइतिवाकुरसंख्यापिनिवाबहुधारेउदकवत्य
वितिमिः।शुचिव्रतेशुचिक्रियेद्यावापृथिव्यौसुकृतेशोभनकारिणेयजमानायघृतंसत्याहिसमृद्धिहेतुभू
हयंदुहाते॥अस्यजगतस्तस्थुतःस्थेहहेद्यावापृथिव्यौअस्यसमुत्पन्नस्यभूतजातस्यराजंतीईशानेसुवांप्रसेअस्मा

श्री

वे·भा पुरेतः प्रजननसमर्थं वीर्यं सिञ्चतं यद्रेतो मनुर्हितं मनुष्येभ्यो हितं ॥ छ ॥ अथ तृतीया ॥ धिषणे इत्यादेः सर्वस्य भुवनस्य निभृते वा
२४ हे रोदसी वां युवाभ्यां यो मन्त्रो मधुमान् अजरे कमणाय युवयोः सुखगमनाय दद्रा शाहं बीषि दृढानि ॥ समृत्यं साधतिका मा
नुसाधयति ॥ किं च प्रजाभिः पुत्रपौत्रादिभिः प्रजायते प्रवृद्धो भवति ॥ धर्म्मणः कर्म्मणः परिधारिषु वो युवयोः सिक्ता
सिक्तानि रेतांसि विश्वरूपाणि नानावर्णानि समव्रतानि समानकर्माणि भूतानि जायंते ॥ छ ॥ अथ चतुर्थी ॥ घृतेनेति ॥
14 द्यावापृथिवी द्यावापृथिव्यौ घृतेनोदकेन अभिवृते अपभवतः घृतश्रिया उदकं श्रयंत्यौ च घृतपृष्ठा वा घृतसंपृक्ते
च घृतवृधावदतं वर्द्धयंत्यौ उर्वी विस्तीर्णे पृथ्वी प्रथिते न भवतः । प्रथाः प्राज्ञास्तोतारः ते इन द्यावापृथिव्यावेव इच्छये यः
होत्रृवुर्ये यज्ञे पुरोहिते यजमानैः पुरस्कृते च भवतः । विप्राः प्राज्ञाः स्तोतारः ते इन द्यावापृथिव्यावेव इच्छयेया । होत्रा इष्टि
रितिनाम सुपाठात् सुम्नं सुखं ईलते याचंते सुखे सनि हियागाः गवर्द्दते ॥ छ ॥ अथ पंचमी ॥ मधुन इति ॥ मधुश्चुत्या
उदकस्य स्त्रावयित्र्यौ मधुदुघे उदकदोग्ध्र्यौ मधुव्रते उदकार्थकर्माणौ देवतादेवताभूते अस्मे अस्मासु यज्ञं द्रविणं राम
धनं च महि महत् श्रवो यशः वाजमन्नं सुवीर्यं सुवीरत्वं च दधाने दधत्यौ द्यावापृथिवी द्यावापृथिव्यौ नो अस्मान् मधु मधुनाष्ट २४
तं यिकवचनस्य लुक् मिमिक्षतां सिंचतां ॥ छ ॥ अथ षष्ठी ॥ कुर्जं न इति ॥ पिता वर्षकस्य मे कुचेन पितृभूता द्यो अस्मा

गाध्मारकत्वेनमारभूता पृथिवी च उभे नो अस्मभ्यं ऊर्जमन्नं पिन्वतां यच्छतां किं चि विश्वस्य हा विश्वंजानं च यो विश्वस्यवेर
यितृ यौ वा सुदंससा सुकर्माणौ संरराणे परस्परोपकार्यैकारकभावेन सहरममाणे रोदसी द्यावापृथिव्यौ अस्मे अस्मा
सु मं निमंभजनीयं वृत्राहिकं वाजं बलं रयिं धनं च समाचिन्वतां संगेरयतां ॥ छ ॥ इति पंचमस्य प्रथमे चतुर्दशो वर्गः ॥ छ ॥ उ
दुष्य देव इति षलृचं दशमं सूक्तं भरद्वाजस्यार्षं सवितृदेवताकं आद्यास्तिस्रो जगत्यः चतुर्थ्याद्यास्त्रिष्टुभः ॥ तथा चानु
क्रांतं उदुष्य सावित्रं त्रिष्टुबंतमिति सूक्तविनियोगो लैंगिकः ॥ चतुर्विंशिकेहनि वैश्वदेवशस्त्रे आद्यस्तृचः सावि
त्रसूक्तस्थाने आवपनीयः । सूत्रितं च । उदुष्य देवः सविता हिरण्ययेति तिस्रो द्यावापृथिवी इति । बृहस्पतिसवे
पि वैश्वदेवशस्त्रे सावित्रसूक्तस्थाने एष तृचः सूत्रितं च ॥ उदुष्य देवः सविता दमूना हिरण्येयेत्यन्नं नि यो हितेति । पृष्ठ्ये पंच
मेहनि वैश्वदेवशस्त्रे उदुष्य देवः सविता दमूना इति तृचः सावित्रनिविद्धानार्थः ॥ सूत्रितं च ॥ उदुष्य देवः सविता दमू
ना इति तिस्र इति । वैश्वदेवपर्वणि सावित्रद्वादशकपालस्य वाममद्य सवितरिति याज्या । सूत्रितं च ॥ वाममद्य सवितर्वाममु
श्वः पूषंतव व्रते वयमिति ॥ छ ॥ तत्र प्रथमा ॥ उदुष्य देव इति ॥ देवो द्योतमानः सुक्रतुः सुकर्मा । स्यः । सः प्रसिद्धः स
विता हिरण्यया हिरण्मयो आत्मीयौ बाहू भवनाय प्रदानाय वा उद्यच्छति । किं च मखो मंहनीयो । युवा नितरुणः

वे·भा सुदत्तःसुप्रसन्नस्त्रजस्रोलोकस्योदकस्योवाविधर्म्मा।णिविधारयोस्थितःवृतेनोदकेनपूर्णौस्तोपाणौअभिस्रुस्नु
१५ तेप्रेरयतिं॥छ॥अथद्वितीया॥देवस्यवयमिति॥तस्यदेवस्यसवितुःप्रेरकस्यविमनिप्रसवेअनुज्ञानेतेथावयाम्
॥मवीमनिप्रसवइति॥श्रेष्ठेअतिशयेनप्रशस्तेवसुनोधनस्यदानेनेदयेयंस्यामसमर्थीभूयास्मायस्त्वंविश्वस्य
सर्वस्यहिपदोनिवेशनेस्थितोप्रसवेचस्वतंत्रोसि।यस्त्वंनृमनोनृश्चतुष्पदोनिवेशनेप्रसवेचस्वतंत्रोसि
॥छ॥अथतृतीया॥अदब्धेभिरिति॥हेसवितःअदब्धेभिःअहिंसितैःपायुभिःतेजोभिःरक्षणसाधनैर्वाशि
15 वेवस्वतंत्रोसि॥छ॥अथतृतीया॥अदब्धेभिरिति॥हेसवितःअदब्धेभिःअहिंसितैःपायुभिःतेजोभिःरक्षण
साधनैर्वाशिवेभिःसुखकरैःनोस्माकंगयंगृहंधनंवा।गयःकृदरइतिगृहनामसुपठितंगयइतिधननामसु
पाठात्अघपरिपाहिरक्षहिरण्यजिह्वोहितरमणीयवाक्यं॥तथाचयास्कः॥हिरण्यंकस्मादितिप्रकम्य
हितरमणंभवतीति॥सुवितायसुखायनव्यसेनवतरायभवरक्षणेस्मान्पालयच॥नोस्माकमघशंसःअन राम
र्थमाशंसमानःशत्रुःनोस्माकंमाकिरीशतमेशत॥छ॥अथचतुर्थीउदेष्यदेवइति॥देवोदानमानाःदमूनादं
मनाःदानमनावा॥तथाचयास्कः॥दमूनादममनावादानमनावादांतमनावेति॥हिरण्यपाणिःहिरण्यपाणिः१५

अयोहनुगरुकंमअयइतिहिरण्यनामसुपाठात्।यजतोयष्टव्यःमंद्रजिह्वःमोदमानवाक्सःसविताउपाति
दोषंगतिरात्रिंरात्रेरवसानेवसानेउदस्थात्उत्तिष्ठतु।योदाशुषेयजमानायमहोभूरिप्रभूतंवामंवननीयंसंभ
जनीयमन्नं।वामंवननीयमित्युत्तिष्ठतुतिष्ठतु।तियास्कः।आसुवतिप्रेरयति॥छ॥अथपंचमी॥उदुष्यइति॥सवि
ताउपवक्तेवअस्माकममधिवक्तेवहिरण्ययाहिरण्ययौसुशातीकाशोभनायववौबाहूउद्यान्उदयच्छत्।योयंपृथिव्याः
पृथिवीपर्यंतान्दिवोंतरिक्षस्यरोहांसिउच्छ्रितप्रदेशान्अरुहत्आरोहति।पतयत्गच्छत्कंचितया।किंदस्मंमहत्सर्वंसुज
नंतिरोहितःअरीरमत्रमयतिच॥छ॥अथषष्ठी॥वाममद्येति॥हेसवितःअस्मभ्यंवामंधनंअघसावीःसुवा।श्वश्वःवामंधनं
प्रसुव।किंचबहुतया।दिवेदिवेदिनेदिनेवामंप्रसुव।हेदेवहियस्मात्त्वयस्यनिवासभूतस्यभूरेःप्रभूतस्यवामस्यदातासिअतो
वयंअयाअनयाधियास्तुत्यावाममभाजोधनवंतःस्यामभूयास्म॥छ॥इतिपंचमस्यप्रथमेपंचदशोवर्गः॥छ॥इंद्रासोमा
महीतिपंचर्चमेकादशंसूक्तंभरद्वाजस्यार्षंत्रैष्टुभंइंद्रासोमदेवताकं॥अनुक्रांतंच॥इंद्रासोमापंचैंद्रासोममिति॥सू
क्तविनियोगोलैंगिकः॥तत्रप्रथमा॥इंद्रासोमेति॥इंद्रासोमाहेइंद्रासोमौवांयुवयोःतन्महित्वंतमहित्वंमहिमहत्किंत
दित्यतआह।युवंयुवांमहानिमहांतिप्रथमानिप्रथनानिमुख्यानिवाभूतानिप्रथमइतिमुख्यनामप्रथमोभवतीति

वे॰भा॰ यास्कः। चक्रथुः अकार्ष्टं। किंच युवं युवां सूर्यं विविदथुः लम्भयेतं वा अंतरा तमः। युवं युवां स्वः स्वर्गं च विविदथुः। हे स्वरित्युदकनामसु
१६ पाठात्। अपि च विश्वा विश्वानि तमांसि निदः निंदितॄन् असुरान् अहतं अहिंस्तं॥ छ॥ अथ द्वितीया॥ इंद्रासोमेति॥ इंद्रासो-
मौ उषसं वासयथः विवासयथः उषसं व्युछंतीं व्युछनं कारयथः॥ इत्यर्थः। किंच सूर्यं ज्योतिषा तेजसा सह उन्नयथः अपि च द्यां
दिवं स्कंभनेन स्तंभनेन हेतुना अंतरिक्षेण मध्ये स्थापितेन उपस्कंभथुः अस्तंभयथः मातरं विश्वस्य मातृभूतां पृथिवीं वि अप्रथतं
16 व्यप्रथयतं॥ छ॥ अथ तृतीया॥ इंद्रासोमौ इति॥ हे इंद्रासोमौ अहिं जगतः आहंतारं अपो मेघस्थान् उदकानि परिष्ठां परिस्थि-
त्य स्थितं वृत्रं असुरं हथः हतवंतौ तदानीं द्यौर्वां युवां अन्वमन्यत। किंच नदीनां अर्णांसि उदकानि ऐरयतं। पुरूणि बहूनि पु-
रूणीति बहुनामसु पाठात्। समुद्राणि उदकस्थानानि आ पप्रथुः उदकैः आपूरयेतं वा। अथवा समुद्रंतीति उदका-
न्येव समुद्राणि। नीरसेन अग्रतः धारभिम इत्यर्थः। तथा च यास्कः। समुद्रः कस्मात् समुद्द्रवंत्यस्मादापः समभिद्रवंत्येनमापः
संमोदंतेस्मिन् भूतानि समुदको भवति समुनत्तीति वेति॥ छ॥ अथ चतुर्थी॥ इंद्रासोमेति॥ इंद्रासोमा हे इंद्रासोमौ आमा राम
सु अपक्वासु गवां वक्षणासु धेनुषु अंतः मध्ये पक्वं पयो निदधथुः। किंच चित्रासु नानावर्णासु आसु जगतीषु गोषु इलाज-
गतीति गोनामसु पाठात्। अंतः मध्ये अनपिनद्धं केनाप्यबद्धं रुशत् शुक्लवर्णं पयो जगृभथुः। यथा पृथिव्यां स्रवं न ह १६

यतितथाधारिन्नवंतावित्यर्थः। इतिपूरणः॥ छ॥ अथपंचमी॥ इंद्रासोमेति॥ इंद्रासोमामहेइंद्रासोमौयुवांतरुत्तंतारकं
अपत्यमाचंसंतानयुक्तंस्कलंश्रवणीयंरयिंधनंअग्निंभरराथेअस्मभ्यंधत्तं किंच। उयाहेउहूमीविंद्रासोमौयुवंयु
वांनर्येन्द्रभ्योहितंपृतनासहंशुष्मंबलंचर्षणीभ्योमनुष्येभ्यः। कृष्टयःचर्षणयइतिमनुष्यनामसुपाठात्। संविव्यथुः।
समभवतुतंपरिवेष्टयथोवा॥ छ॥ इतिपंचमस्यप्रथमेषोडशोवर्गः॥ छ॥ योअद्रिभिदितित्र्यृचंबार्हस्पत्यंभरद्वाजस्यार्षं
त्रैष्टुभंबृहस्पतिदेवताकं॥ तथाचानुक्रम्यते। योअद्रिभित्र्यृचंबार्हस्पत्यमिति। आभिप्लवेषूक्थ्येषुतृतीयसवनेब्राह्मणा
च्छंशस्त्रेस्तोमातिशंसनार्थमिदंसूक्तंसूत्र्यतेहियोअद्रिभिद्ग्रयम्नेहिविइतिसूक्ते इति। वाजपेयेबार्हस्पत्यस्यचरोर्बृहस्प
तिःसमग्रयहन्तुनिनामीलतेअजिरंइत्यायेति। छ॥ तत्रप्रथमा॥ योअद्रिभिदिति॥ योबृहस्पतिरद्रिभित्पणि
भिर्विरचितानांशिलोच्चयानांभेत्तामेघानांविदारकोवा अद्रिःग्रावेतिमेघनामसुपाठात्। प्रथमजाःप्रजापतेर्वीर्यात्
प्रथमंजातःऋतावानमस्यवानुदकवान्वाआंगिरसःपश्चात्कालेयेगारा आसंस्तेंगिरसोभवन्यदंगाराःपुनरवशा
तादुद्धयंततइहस्पतिरभवदिति॥ हविष्मान्यज्ञभागवान्द्विबर्हज्माद्वयोर्लौकिकयोर्वृद्धेहिवगमनःआद्यस्मेसतश्च
कर्षेणदीप्तस्थानेवर्त्तमानोनोस्माकंपितापालयिताभवतिसबृहस्पतिर्वृषभोवर्षकःसन्रोदसीद्यावापृथिव्यौ

वे॰भा॰ रोरवीति अभिगर्जति॥ छ॥ अथ द्वितीया॥ जनाय चिद्य इति॥ अपि च यो बृहस्पतिः देवहूतौ यज्ञे वर्तमानाय ईवते उपग-
१७ च्छते स्तोत्रे जनाय लोकं स्थानं चकार करोति विहिति पूरणः सवृत्राणि आवरकाणि तमांसि घ्नन् विवारयन् स पृत्सु युद्धेषु शत्रू-
न् जनयन् अमित्रान् सहन् अभिभवन् पुरः आसुरीः पुरीः विदर्दरीति भृशं विदारयति॥ छ॥ अथ तृतीया॥ बृहस्पतिरिति
॥ देवो द्योतमानः एष अग्निर्हो बृहस्पतिः वसूनि पणीनामसुराणां लवस्य बाधनानि महो महतो गोमतो गोसहितान् व्रजांश्च
समजयत् तथा च निगमो॥ बृहस्पतिर्गा उषसो वस्मान् निर्मज्जो नानं पर्वणो जारेति॥ इरमित पणे यो वरीय उद्गा वोयंतु
मिनती स्वेतेन॥ बृहस्पतिर्या अविन्दन् निगूळ्हाः सोमो ग्रावाण ऋषयश्च सर्वा विसाइति॥ किं च बृहस्पतिः अप्रतीतः केनाप्य-
प्रतिगतः सिषासन् संभक्तुमिच्छन् स्वः स्वर्गस्य अमित्रं असुरं अर्कैः अर्चनैः साधनैर्मंत्रैर्हंति॥ अर्को मंत्रो भवति यदेनेना-
र्चंतीति यास्कः॥ छ॥ इति पंचमस्य प्रथमे सप्तदशो वर्गः॥ छ॥ सोमारुद्रेति चतुर्ऋचं त्रयोदशमं सूक्तं भरद्वाजस्यार्षं त्रैष्टु-
भं सोमारुद्रदेवताकं॥ अनुक्रम्यते च॥ सोमारुद्रा चतुष्कं सोमारौद्रमिति विनियोगो लैंगिकः॥ छ॥ तत्र प्रथमा॥ सोमारु- राम
द्रेति॥ सोमारुद्रा हे सोमारुद्रौ॥ असुर्यं असुरसंबंधि बलं अस्मासु धारयेथां॥ किं च दमेदमे सर्वेषु स्मद्गृहेषु इष्टयो यज्ञा-
वां अरमलं पर्याप्तं यथा अश्नुवंतु प्रकर्षेण व्याप्नुवंतु॥ अपि च युवां सप्त रत्नानि दधाना धारयंतौ अस्मभ्यं शं सुखकरौ सुखरूपौ १७

17

वाभूतं भवतं द्विपदे अस्मदीयाय पुत्राय ये च चतुष्पदे पश्वादये च भूतं भवतं ॥ छ ॥ अथ द्वितीया ॥ सोमारुद्रेति ॥ सोमारुद्रौ नोऽस्माकं
गयं गृहं गृहगतं प्राणिजातं वा अमीवा अमीवा यो रोगः आविवेश तां विसूचीं विष्वक् सर्वतो गच्छंतीं अमीवां विवृहतं वियोजयतं । अ
पि च निर्ऋतिं मलरूपां पराचैः पराग्यथा भवति तथा आरे दूरे बाधेथां निवारयतं अस्मे अस्माकं भद्रा भद्राणि सौश्रवसानि यशां
सि च संतु भवंतु सुश्रवसो भावः सौश्रवसं श्रवो नं यशश्च ॥ छ ॥ अथ तृतीया ॥ सोमारुद्रेति ॥ हे सोमारुद्रा सोमारुद्रौ युवं
युवां अस्मे अस्माकं तनूष्वंगेषु एतानि अस्मिद्धानि विश्वा सर्वाणि भेषजानि धत्तं धारयतं किंच नोऽस्माकं तनूषु अंगेषु अस्माभिः
कृतं बद्धं च यदेनः पापमस्ति विघनेन तत्पापं अव स्यतं अवसाययतं शिथिलबद्धं कुरुतमित्यर्थः ॥ अस्मदस्मत्तो मुंचतं ॥ छ ॥ अथ च
तुर्थी ॥ तिग्मायुधाविति हे सोमारुद्रौ तिग्मायुधौ दीप्तधनुष्कौ तिग्महेतीतीक्ष्णहेती शरौ सुशेवौ शोभनसुखप्रदौ सुमनस्यमानौ शो
भनं मनस्तोत्रमिच्छंतौ सुमनस्यमानौ सूयमानौ सुमनसौ वा सतौ युवां इह लोके नोऽस्मान् सु अत्यंतं मृलं तं । नोऽस्मान् वरुणस्य पा
शात् प्रमुंचतं च नोऽस्मान् गोपायतं आपद्भ्यो रक्षतं च ॥ छ ॥ इति पंचमस्य प्रथमे अष्टादशो वर्गः ॥ छ ॥ जीमूतस्येत्येकोनविंशं चै
चतुर्दशं कं सूक्तं भरद्वाजस्य पायोरार्षं ॥ अनुक्रम्यते । जीमूतस्यैवैकोना पायुर्भारद्वाजः संग्रामांगान्यस्तौत् क्रमशो मिं तुष्टाव वर्मधनुर्ज्या
मार्त्नी इषुधिं जगत्यर्द्धे सारथिमर्द्धे रश्मीन् अश्वान् रथं रथगोपाजसां लिंगोक्त देवता द्वाभ्यामिषूः प्रेतोदं हस्तघ्नं द्वाभ्यामिषूः परा: पंक्त्या

द्वयोर्लिंगोक्तदेवताः संग्रामाशिषोत्यानुष्टुप् प्रसज्जीकस्त्रालाबके तितिचहे हेइति॥ रथेनिष्ठन्नयतिब्राह्मणं सद्इति षष्ठी दशम्योजग
त्यौ अंत्यायोनः सो अरणइत्येषानुष्टुप् प्रसजीते आजंघंति आल्ला का अवस्थायोनः स्वस्त्इति पंचानुष्टुभः यत्रबाणाइति पं
क्तिः शिष्टास्त्रिष्टुभः॥ आद्ययावर्म सूयते द्वितीयया धनुः तृतीययाज्यां चतुर्थ्यार्त्नी पंचम्या इषुधिः अतः पंचानां मघर्वाघा देव
ताः षष्ठ्या पूर्वार्द्धेन सारथिस्तूयते अतः सोर्द्धर्च लिंगदेवताकः॥ उत्तरार्द्धेन रश्मयः स्तूयंते। सप्तम्याश्वाः॥ अष्टम्या रथः। नवम्या र
थगोपाः॥ अतस्ताल्लिंगदेवताकाः ब्राह्मणास इत्यस्यां ब्राह्मणाः पितरः सोम्यासः द्यावापृथिवी पूषणो लिंगोक्तदेवताः एकादशीद्वा
दश्या विष्णुस्तुतिरूपत्वान इषुदेवताके॥ त्रयोदश्या प्रतोदः चतुर्दश्या हस्तघ्नः पंचदशी षोडश्या विष्णुदेवताके॥ सप्तदश्या युद्धे भूमि
ब्राह्मणस्पत्यदितिरूपा लिंगोक्तदेवताः॥ अष्टादश्याः कवचसोमवरुणदेवताः अंत्याया देवा ब्रह्म च देवता॥ युद्धे अनेन सूक्ते
न राजानं संनाहयेत्। तथा चाश्वलायनः। संग्रामे समुपोढे राजानं संनाहयेद्वा हार्षमंतरे धीतिपश्चाद्इत्यस्यावस्थाय जीमूतस्ये
व भवति प्रतीकमिति कवचं प्रयच्छेत् उत्तरायां धनुः उत्तरायां वाचयेत् तृतीयं चतुर्थीं जपेत् पंचम्येषुधिं प्रयच्छेत् रथ प्रवर्तमाने षष्ठीसप्तम्या
श्वानष्टमी तिस्रॄन्वेक्षणं वाचहि रिवि भोगैः पर्येति बाहुमितलं नह्यमानमिति तिनयाचा देवस्याः पराप तेतीषून्विसृज्य सजीर्यध्वत्रबा
णाः संपतंतीति युद्ध्यमाने जपेत् संशिष्याद्धेति अध्यायोपाकरणयोत्सर्जनयोर्मंडलांतहोमे प्रैनः स्वस्त्इत्येषा॥ छ॥ तत्र गथ्यम

॥जीमूतस्येवेति॥ समदां संग्रामाणां उपस्थे उपस्थाने सति यद्वा यदायं राजा वर्मी विचीयाति तदा लोहमयेन वर्म्मणा सन्नद्धस्य
राज्ञः प्रतीकं रूपं जीमूतस्येव मेघस्येव भवति मेघस्येव यादृशं रूपं तादृशमस्य भवतीत्यर्थः। हे राजं त्वं अनाविद्धया शत्रुभिरबा
धितया तन्वा शरीरेण शत्रून् जय वर्मणः स तादृशो महिमा त्वा त्वां पिपर्त्तु पालयतु॥छ॥ अथ द्वितीया॥ धन्वना गा इति॥ धन्वना चा
पेन गाः शत्रूणां जयेम भवदीयं वशीकरवाम धन्वना आजिं संग्रामं च जयेम धन्वना तीव्रा उद्धताः समदः अस्मत् मदवतीः शत्रुसेना अज
येम॥ तथा च यास्कः॥ समदः समदो वात्तेः संमदो वा मदतेरिति॥ धनुः शत्रोरपकामं कामस्यापायं कृणोति करोतु॥ किंच धन्वना व
यं सर्वाः प्रदिशः सर्वासु दिक्षु वर्त्तमानान् शत्रून् जयेम॥ प्रदिक्शब्दो लक्षणया तत्स्थेषु पुरुषेषु वर्त्तते॥ मंचाः क्रोशंतीतिवत्॥ धन्वनु
शब्दस्य जयते श्चार्दर्न्निरादरार्थः॥छ॥ अथ तृतीया॥ वक्ष्यंतीवेदिति॥ पूर्वेन त्र्यस्य गृह्येन कवचधनुषी स्तुते। अत्र ज्यास्तुतिः॥ इ
इषुषु क्षिप्यमाणेषु इषुधिः क्षिप्र शब्दं करोति। किंच इषुधिः पृष्ठे इयं ज्या समने संग्रामे धन्वन् धन्वनि अधि वितततमा इवानुवादी वित
ता विस्फाता पारयंती पारं नयंती प्रियं प्रियकरं वाक्यं वक्ष्यंती इव कर्णं धन्विनो राज्ञः कर्णप्रदेशं आगनीगंति आगच्छति॥ इवि
पूरणः॥ योषा नारी सखायं पतिमिव परिषस्वजाना इषुं परिष्वज्यमाना शिंक्ते शब्दायते च॥ तथा च यास्कः॥ वक्ष्यंतीवागच्छति क
र्णं प्रियं मित्रं सखायं मिवं परिष्वज्यमाना योषेव शिंक्ते विशब्दं करोति वितताधि धनुषि ज्येयं समने संग्रामे पारयंतीति पारं नयंतीति

वे॰भा॰ १९

19

॥छ॥ अथचतुर्थी॥ तेआचरंतीइति॥ अत्रधन्वकोट्योः स्तुतिः धनुष्कोट्यौ समनेवसमनस्केवयोषापतिमिवसमीपंनस्य जनितेइव आचरंतीअ

भितआचरंत्यौऽपस्थेउपस्थानेमातेवपुत्रंयथामातापुत्रंधारयतितद्वत्बिभ्रतंराजानंधारयेतां॥ किंचइमेधनुष्कोट्यौ संविदानेसंजाना

नेविसंवादेरहितेआर्त्नीगच्छंत्यौ। सगतारविविधताः चतुर्यगिभ्यांनिशितिबाहुलकात्निशस्ययोधनतोशत्रूनभावयत्वा। तेतः स्फुरिकारा

दिक्विनइतितउखहिवचनस्यपूर्वसवर्णः। असरामसः अमित्रान्विष्फुरंतीविहिंसंत्यौशत्रून्अपविध्यतां॥ तथाचयास्कः। तेआच

रंत्यौसमनसाविवयोषेमातेवपुत्रंबिभृतामुपस्थउपस्थानेविध्यतांशत्रून्संविदानेआर्त्नीविमेविघ्नंत्यावमित्रानिति॥छ॥

अथपंचमी॥ बह्वीनांपितेति॥ इषुधिरत्रस्तूयते। इषुधिः बह्वीनामिषूणां पिताभवति। रक्षणहेतुत्वात्पितेत्युच्यते। इषुशब्दस्यो

भयत्वात्बह्वीनामितिङयोगः। अस्यइषुधेः पुत्रः इषुर्बहुर्भवति। बहवोइषवोइषवोहिइषुधौनिधीयंते। इषूणांसंनिधानत्वात्।

हिषुधेः। तथाचयास्कः॥ इषुधिरिषूणांनिधानमिति। चिश्चाकृणोतीतिचिश्चेतिशब्दानुकृतिः। इषुषुधियमानेषुइषुधिश्चिश्च

शब्दंकरोति। किंचइषुधिः पृष्ठेनिनद्धः धन्विनोराज्ञः पृष्ठभागेबद्धः समनाः युद्धानिअवगत्यशाप्यअसूतःप्रसूतंवानुकर्तीरिनिष्ठाः इ

षून्शेरयन्सहकार्यंनिशध्यायंतेइइतिसंकाः एतनाः सर्वाःसेनाःजयति॥छ॥ इतिपंचमस्यप्रथमेएकोनविंशोवर्गः॥छ॥ अथ

षष्ठी॥ रथेतिष्ठन्निति॥ अत्रपूर्वार्द्धेसारथिस्तुतिः। उत्तरार्द्धेभीसूनांस्तुतिः। सुषारथिः शोभनसारथिः रथेतिष्ठन्पुरःपुरस्तात्

राम १९

नस्तुनस्तुयोध्राप्रेरितः
त्यर्थेकर्मण्येवकः।त
यात्रगतिस्वरः।२

र्तमानानूयच्चनेतुं कामयते तेन चततच्चनयति ये रथे ये रश्मयो ऽश्वयी वाम्यो व्याथवर्त्तमानाः पाशाः पश्चात् रथस्य पृष्ठभागे विद्यमानान्
श्चानू मनः सारथेर्मनो ऽनुकल्पं अनुयच्छंति तेषाममीषूनां रश्मीनां महिमानं महत्त्वं पनायत हे जनाः स्तुत । तथा चयास्काः । रथेति
ष्ठं नयति वाजिनः पुरस्तात्सतो यत्र यत्र कामयते सुषारथिः कल्याणसारथिरभीशूनां महिमानं पूजयत मनः पुरस्तादनुयच्छंतिर
शय इति ॥ छ ॥ अथ सप्तमी ॥ तीव्रान्घोषानिति ॥ अत्राश्वस्तुतिः अश्वाः वृषपाणयः पांसूनां वर्षुकखुराः रथेरथैः सहवान्
यंतो वेगाच्चरंतः तीव्रान् उच्चरान् घोषान् कृण्वते कुर्वते । अनपव्ययमानाः अमित्रान् शत्रून्प्रपदैः पदैर्गोः अवक्रामंतः
क्षिणंति हिंसंति ॥ छ ॥ अथाष्टमी ॥ रथवाहनमिति ॥ अत्र राज्ञः रथवाहनं शत्रून्जित्वा रथेनोह्यमानं धनं हविर्भवति ष अ
ग्नेहविर्भवति अग्नेर्हविरिव हृद्यं भवतीत्यर्थः ॥ नामेति संमतिः यत्र रथे अस्य राज्ञः आयुधं धनुःशरादिकं वर्म कवचं चनि
हितं भवति तत्र तं तत्रैव स्यवयस्य सर्वविभक्तिकत्वात् शग्मं सुखकरं विश्वाहा सर्वदा सुमनस्यमानाः सुखमनसो भवंतो
वयं पायवो भारद्वाजाः उपसदेम उपसदेम उपगच्छेम ॥ छ ॥ अथ नवमी ॥ स्वादुषंसद इति ॥ अत्र रथगोपास्तुतिः । पितरो रथस्य पा
लयितारः । स्वादुषंसदः शत्रूणां स्वादुन्यत्रैसंसदंतः शत्रूणां मन्नमवसादयंतो वा वयोधाः अन्नस्य दातारः कृछ्रेश्रितः आपत्स्वा
यंतः शक्तिरायुद्धविशेषः तद्वंतः शक्तीवंतः शत्रूणां मन्नमवसादयंतो वा वयोधाः अन्नस्य दातारः शक्तीवंतः शक्तीहस्तादइतियात् । यद्दा

वे·भा· शक्तिबलं तद्वन्तः गामीराः अनाधृष्याः चित्रसेनाः दर्शनीयसेनाः इषुबलाः बाणबलाः अमृध्राः हिंसितुमशक्याः सतोवीराः प्राप्तवीराः त
२० याचयास्कः॥ तिरःसतइतिप्राप्तस्येति रश्मीर्ष्य भवति सतःसंस्थं भवतीति॥ उरवो महान्तः ज्ञातसाहाः समूह्हानामभिभवितारो भवं
तीति॥ छ॥ अथ दशमी॥ ब्राह्मणास इति॥ ब्राह्मणासो हे ब्राह्मणाः पितरः सताव्यधः सव्यस्य यज्ञस्य वा वर्द्धयितारः सोम्याः सोमार्हाः
सोमसंपादिनो वा॥ तथाचयास्कः॥ सोम्याः सोमसंपादिन इति॥ नोस्मानूह्हन्तरद्वेस्य परितन्यामकवचनांतं सस्यपिव्यवधानेबहुव
चनांतं तथाविपरिणतं सद्वत्र संबध्यते अध्याहारस्याभिजबंन्यत्वात्॥ किंच अनेहसा अपापे द्यावापृथिवी द्यावापृथिव्यौ नोस्माकं
शिवे सुखकृतौ भवतं॥ पूषपौषकोदेवो घिनोस्मानूदुरिताद्दुःकृतान्पातुरक्षतु नोस्माकमघशंसः शत्रूरपि माकिरीशत मार्इशि
ष्ट॥ छ॥ इति पंचमस्याध्यायस्य प्रथमे विंशो वर्गः॥ छ॥ अथैकादशी॥ सुपर्णं वस्त इति॥ अस्यामेजी षुक्तु यते॥ सुपर्णं शोभनं वाजं वस्ते इय
मिषुर्द्धारयति॥ अस्याः इषोः मृगो मृगावयवः शृंगं दंतो भवति इषवः काश्चिद्दंतमुखा भवंतीति हि॥ अथवा अस्या दंतः मृगः शत्रून्मृ
गयमाणो भवति॥ किंच गोभिर्विकारैः स्नायुभिः सन्नद्धा सम्यक्बद्धा॥ अथवा गोरिति ज्यानामतया संबद्धा॥ अत्र वचनव्यत्य राम
यः तथाचनिगमः॥ इहेवशृण्वे नियतामीमयाद्गौरिति॥ अस्यायमर्थः॥ इहेव श्रेघनुषिधनुषि ज्यां नियता नियतामीमयत् शब्दं
करोति॥ तथाचयास्कः॥ इहेव शृण्वे धनुषिधनुषि शब्दोत्र अनानदनाशास्तोति छ तीतिबाहाहा स्नीयते निर्वामकर्मणो नियातामीमय २०

तशब्दं करोति। तथा च यास्कः। इष्वेषु स्पेधनुषि धनुषि इष्वसो वश्यत्नावत्वात्सां तिष्ठतीति वाणाख्यानीयते निर्वाणकर्मणोनि
यतामीमयाङ्क्रोः शब्दं करोति मीमयतिः शब्दकर्मेति। अमूनाशरेतामनीपतति। यत्र युद्धे नरः संचरन्ति सह च पृथक्च इवं तिरंचति
तत्रास्मभ्यं इषवः शराः शर्म सुखं यंसन् प्रयच्छंतु। तथा च यास्कः सुपर्णं वस्त इति वाजानभिप्रेत्य मृगमयोस्यादन्तो मृगय
तेर्वागोभिः संनद्धा पतति प्रसूतेति व्याख्यातं यत्र नराः संद्रवंति विद्रवंति च तत्रास्मभिषवः शर्म यच्छंतु शरणमिति॥छ॥
अथ द्वादशी॥ ऋजीते परीति॥ ऋजीते ऋजुगाच्छती त्वृजीतिरिषुः हे इषो नोस्मान् परिवृंग्धि परितो वर्जय नोस्माकं तनूः श
तोभिश्च संविदानः सम्यक् ज्ञानं एकमत्यं प्राप्तः इत्यर्थः ॥ छ ॥ अथ पंचमी ॥ आ नो दधिक्रा इति । दधिक्राः अ
श्वरूपो देवः अत्र सत्यस्य पथ्यां पथ्यानं मार्गं अन्वेतवै अनुगंतुं प्रवर्तनानां नोऽस्माकं पथ्यां पदवीमानः कृणु उदके
नाग्निं चतु उइति स्मरणः । देव्यं शर्द्धः देवसंबंधि बलं ईदृग्रूपो अग्निः नोऽस्मदीयं हवं शृणोतु । अमूरा अमूढाः महि
षा महांतः विश्वे सर्वे देवाः अस्मदीयं हवं शृण्वंतु ॥ छ ॥ इति पंचमस्य चतुर्थे एकादशो वर्गः ॥ छ ॥ आ देवो यातिव
ति । चतुर्दशर्चं दशमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं सवितृदेवताकं त्रैष्टुभं । आ देवस्य त्र्युचं सावित्रमित्यनुक्रांतं । सू
क्तेदस्य शरावे चतुर्थेऽहनि वैश्वदेवं शस्त्रे इदं सावित्रं निविद्धानं सूक्तं तेहि । चतुर्थेऽहन्या देवो याति येषां तु वपा राम
नुवाक्या सूक्तं तं वा आ देवो यातः तु सविता सुरत्नः सधानो देवः सविता सहावेति । अश्वमेधे अनुसवनं त्रिषु सा ८५

विघ्नम् इत्यर्थः ॥ तत्रैव द्वितीयामिष्टौ याज्येयं सूत्रितं च ॥ य इमा विश्वा जातान्या देवो यातीति ॥ तत्र प्रथमा ॥ आ देवो यातीति ॥ सुर
त्नः शोभनरत्नोपेतः अंतरिक्षस्थाः स्वकीयेन तेजसा अंतरिक्षस्य पूरयिता अश्वैः स्वकीयैर्वोढृभिः वहमानः उह्यमानः सविता सर्व
स्य प्रेरको देवः आयातु आगच्छतु ॥ कीदृशः नर्याः नर्याणि मनुष्यहितानि रत्नानि बहूनि धनानि हस्ते पाणौ दधानः दातुं धार
यन् भुवना भूतानि निवेशयन् वशी च विश्वस्मिन् स्थाने पश्यंश्च प्रसुवन् च प्रेरयन् सुपेशस्यश्च एवंभूतः सविता देव आयातु ॥ छ ॥ अथ
द्वितीया ॥ उदस्य बाहू इति ॥ शिथिरा शिथिलौ दानार्थं प्रसारितौ बृहंता बृहंतौ हिरण्यया हिरण्ययौ सुवर्णमयौ अस्य स
वितुः संबंधिनौ बाहू हस्तौ दिवोंतरिक्षस्य अंतान् पर्यंतान् उदस्थात् ऊर्ध्वौ संतौ व्याप्नुवतां ॥ नूनमस्य अस्य इदं नूनं तस्य सवि
तुः सतो महिमा महत्त्वं पनिष्ट अस्माभिः स्तूयात ॥ सूरश्चिद् वसूर्योपि अस्मै सवित्रे अपस्यां कर्मेच्छां अनुदात् अनुददा
तु ॥ छ ॥ सावित्रे पशौ पुरोडाशस्य हविषः सघानः इति द्वे अनुवाक्ये सूत्रं पूर्वमुदाहृतं ॥ आश्वमेधिकीषु सावित्रेष्टिषु तृ
तीयस्यामिष्टौ इमे एव याज्यानुवाक्ये ॥ सूत्रितं च ॥ सघा नो देवः सविता सहावेति द्वे इति ॥ सैषा सूक्ते तृतीया ॥ सघा नो देव
इति ॥ महावाते ज्योतिराणमिष्टौ इमे एव याज्यानुवाक्ये ॥ सूत्रितं च ॥ सघा नो देवः सविता सहावेति द्वे इति सैषा सूक्ते तृती
या ॥ सघा नो देव इति ॥ महावाते ज्योतिराणमि मावुकं तेजो यस्य सः वसुपतिर्धनानां पालकः सः सविता देवः नोस्मभ्यं वसुध

नानिश्वासाविषत् आसमंतात् प्रेरयति । घेति पूरणः । मनू अध अद्य नोऽस्मभ्यं मर्तभोजनं मनुष्याणां भोगयोग्यं धनं रास्व
तद्दातु ॥ ७ ॥ अथ चतुर्थी । इमा गिर इति । इमा ईं इह सूनृता गिरः ग्रणंति स्तुवंति । तिगिरः स्तोतॄणां यह्वा इमाः स्तुतिरूपाः
वाचः सुजिह्वं शोभनजिह्वं शोभनवाचमित्यर्थः ॥ पूर्णगभस्तिं संपूर्णधनहस्तं सवितारं देवं ईळते स्तुवंति मम च सविता वि
चैत्रायनीयं बृहन्महत् वयो अन्नं अस्मे अस्मासु दधातु यद्वा अस्मे अस्मभ्यं प्रयच्छतु ॥ हे सवितृप्रमुखा देवाः यूयं नोऽस्मभ्यं नू स्व
स्तिभिः कल्याणैः सदा सर्वदा पात पालयत ॥ ८ ॥ इति पंचमस्य चतुर्थे द्वादशो वर्गः ॥ ७ ॥ इमा रुद्रायेति चतुर्ऋचं चतुर्दशं
सूक्तं वसिष्ठस्यार्षं रुद्रदेवताकं । अंत्या त्रिष्टुप् शिष्टा जगत्यः तथा चानुक्रमणिका ॥ इमा रौद्रं त्रिष्टुबंतमिति । शूलगवा
दिषु रौद्रयज्ञेषु अनेन सूक्तेन उदीचीं दिकुपस्थेया । सूत्र्यते हि । इमा रुद्राय स्थिरधन्वन इति सर्वरुद्रयज्ञेषु दिशामुप
स्थानमिति ॥ तत्र प्रथमा ॥ इमा रुद्रायेति । हे अस्मदीयाः स्तोतारो यूयं इमा गिरः स्तुतीः रुद्राय एतन्नामकाय रुद्राय भरत
धारयत । कीदृशाय । स्थिरधन्वने दृढधनुष्काय क्षिप्रेषवे शीघ्रगामिबाणाय स्वधान्ने अन्नवते अषाह्लाय केनाप्यनभि
भूताय सहमानाय शत्रूणामभिभवित्रे वेधसे धात्रे तिग्मायुधाय तीक्ष्णास्त्राय एवंभूताय रुद्राय स्तुतीर्भरत स च रुद्रो नो
ऽस्मदीयाः स्तुतीः शृणोतु ॥ १ ॥ अथ द्वितीया ॥ स हि क्षयेणेति । स हि खलु रुद्रो देवः क्षम्यस्य क्षमायां पृथिव्यां भवस्य

जन्मनोजनस्यसहयेणौर्येणाचेतविग्रज्ञायते।द्विघस्यजनस्यवसां ग्राज्येनैाश्वर्येणप्रज्ञायते।शेषःप्रचयस्तरूतः।हे
रुद्रत्वंचअवीः त्वांस्तोत्रैस्तर्पयंतीः नोस्मदीयाःप्रजाः अवन्पालयन्नुदुरोदुर्याणिअस्मदीयानिगृहाणिउपच
रउपगच्छ।किंचत्वंनोस्मदीयासुप्रजासुअनमीवःअमीवारोगःलामकुर्वन्भव॥छ॥अथतृतीया॥यातेदिद्युदि
ति।हेरुद्रतेघृतात्मनस्तवसंबंधिनीदिवस्परिअंतरिक्षात्सकाशाद्ववसृष्टाविसृक्तायादिद्युत्।अशनिरूपा
हेतुः।सयाक्ष्मियाक्षितौवाचरतिवर्त्तते।सादिद्युत्नोस्मान्परिदृणक्तुपरित्यजतु।अपिचहेस्वपिवातत्तेतवसहस्रं
बहूनिभेषजानिभेषजानियात्यौषधानिसंसितान्यस्मभ्यंप्रयच्छेतिशेषः।नोस्माकंतोकेषुचेपुत्रतनयेषुचमारि
षःहिंसांमाकृथाः॥छ॥अथचतुर्थी॥मानोवधीरिति।हेरुद्रत्वंनोस्मान्मावधीःमाहिंसीः।तथामापरा
रःमाचयासीः अपिचहिलितस्यक्रुद्धस्यतेतवशमितोप्रकर्षेणप्रबंधनेवयंनमाभूम।किंचजीवशंसेजीवे
रीयोशंसनीयेबर्हिषियज्ञेनोस्मान्आभजआभागिरःकुरुहेरुद्रप्रमुखादेवाःयूयंनोस्मान्कल्याणैःसर्वदा
पालयत॥छ॥इतिपंचमस्यचतुर्थेचयोदशोवर्गः।आपोयंवइति।चतुर्स्रचंपंचदशसूक्तंवसिष्ठस्यार्षंत्रैष्टुभं
दैवताकंआपोयमापामित्यनुक्रांतं।तप्रातोविनियोगः।तत्रप्रथमा।आपोयंवइति।देवयंतोदेवान्इच्छं

वे॰भा॰ तौध्वर्यवः हे आपः हे शरैवताः वो युष्माकं कार्यभूतं इदं पानं इंद्रेण पातव्यं इलः इलायाः भूम्याः संभूतं य
८७ मूर्मिं सोमाख्यं यं रसं गथमं पुरा अक्रू शतत्र अभिषवणपचनादिभिः समस्कुर्वत अथेदावयमपि वो युष्म
दीयं तमूर्मिं वनेम संभजेम हि कीदृशं शुद्धं अरिशं पापरहितं घृतप्रुषं घृतदृष्टिलक्षणमधुरकं सिंचंतं मधुमंतं मु
87 धुररसोपेतं एवंभूतं तं वो मे मतिं संबंधः ॥ छ ॥ अथ द्वितीया ॥ तमूर्मिमापइति ॥ हे आपः एतसंज्ञका हे वा अो
युष्मदीयं मधुमत्तमं रसवद्रूपं तमूर्मिं शसिद्धं सोमाख्यं रसं आसु इह माशी घगालिः अपान्नपात एतदाख्यो दे
वः अवतु पालयतु इदं अस्मिन्नूर्मी वसुभिर्वा समेर्दैः सह मादयाते माद्येत अघाम्निन्नूरिते देवयंतो देवकामा यं वयु
ष्मदीयं तमूर्मिं अश्याम अश्नुयाम ॥ छ ॥ अथ तृतीया ॥ शतपवित्राइति ॥ शतपवित्राः शतं बहूनि पवित्राणि पा
वनानि रूपाणि यासां ताः स्वधया स्वकार्यभूतेनान्नेन मदंतीः जनान्मादयंत्यः देवीः देव्यः द्योतमाना आपः देवाना
मिंद्रादीनां पथः स्थानमपियंति प्रविशंति ता आस्तादृश्य आपः इंद्रस्य प्रीणनानि व्रतानि यज्ञादीनि कर्माणि नामि राम
नंति न हिंसंति ॥ ता आस्यं तीचयर्थः ॥ हे अध्वर्यवो यूयं सिंधुभ्यः ताभ्यो अद्भ्यः घृतवत् उपस्तरणाभिघारणलक्षणा ८७
ज्यप्रयुक्तं हव्यं पुरोडाशादिकं हविर्जुहुत ॥ छ ॥ अथ चतुर्थी ॥ याः सूर्य इति ॥ सूर्यो देवः या आपः रश्मिभिः स्वकी

येः किरणैः आततानविस्तारयति सूर्यो हि रश्मिभिरुदकमारमादायवर्षतीत्यर्थः ॥ याभ्यो ऽस्मऊर्मिं अंतरि
दं रूपं मनयोगपंगातुं मेघेभ्यो निर्गमनसाधनं मार्गं इंद्रोपि अर्द्दनवर्जैपामेवानूनोऽदयानृयच्छति हे सिंधव
आपः ते यूयं नो समभ्यं वरिवोधनं धनं धत्तन धत्तप्रयच्छत ॥ तइति सिंधुशब्देन समानाधिकरणत्वात्पुल्लिंगत्वा हे
शब्देभंसमुदेवताकं अंच्यायाविकल्पेन विश्वेदेवादेवता ॥ तथाचानुक्रांतं । समुक्षण आभवमं त्यावैश्वदेवी
वेति । दशमेहनि वैश्वदेवशस्त्रमार्भवनिविद्धानं । सूत्रितं हि । ऋभुक्षणमित्याभवमिति ॥ छ ॥ तत्रप्रथमा ॥ स
मुक्षणइति ॥ समुक्षाइति समूणां ज्येष्ठस्याख्या वाजइति चकनिष्ठस्य अत्र ऋभुक्षणो वाजा इति बहुवचनेन स
र्भवस्त्रयोगृह्यंते ऋभुक्षणो वाजाः नरो नेतारः मघवानो धनवंतः एवंभूता हे ऋभवः यूयं अस्मे अस्माकं सुस्थिते वसु
तस्याभिष्टुतेन सोमेन मादयध्वं रत्नाभवतनेति संप्रत्यर्थौ ॥ इदानीं यागानां गछतां वोयष्मदीयाः कानवः कमेणां
कर्तारः विप्रोनिभवः समर्थ्या अर्वाचीनं चः अस्माभिमुखाः संतो नयंमनुष्यरथं युष्मदीयं आवर्त्तयंतु ॥ छ ॥ अ
थ द्वितीया ॥ समुसरभुभिरिति ॥ हे ऋभवः ऋभुभिर्युष्माभिः वयं ऋभुरूभवंतः भवः विभुभिर्युष्माभिः वि
भ्वोविभवः अमंतः शवांसि शत्रूणां बलानि शवसा युष्मदीयेन बलेन अभिस्याम अभिभवेम ततथा वाजसातोसं

वे॰भा॰ ग्रामेवाजः एतत्संन्यकसमुश्चस्मानवतुपालयतु अपिचयज्ञासहायभूतेनेंद्रेणदंशंशत्रुंवयंतरुषेमहननामसघायेण
८८ सभवोपींद्रेणसहस्तूयतेइंद्रि॥छ॥अथतृतीया॥तेचेद्धीपूर्वीरिति॥ततादशाद्वंद्वसभवस्वपूर्वीर्वद्धीःअस्म
छत्रुसेनाःशासाशासनेनस्वकीययाआज्ञयायद्याविशस्यतेहिंस्यन्तेवेतिशामशब्दआयुधवाचीतेनअभि
संतिअभिभवंति।चिद्धितीमोपूरणे।किंचउपरतानिसन्नम्यालुकुडपरेरुपलैःपाषाणसदृशैराअधैस्नायतेवि
स्नार्यतइत्यपरतानितिवृहंतस्मिन्ज्ञानूताडयन्तअयच्छन्ति।हेसिंधवआपःतेयूयंनोस्मभ्यंवरिवोधनंधनतवविश्वान्तस
गस्तान्अर्यअरीन्शत्रून्वनुवंत्वहिंसंति।विश्वासमुहाभावाचःएवसंजकाःसभवाश्चेंद्रश्चअर्यःशत्रूणामभिगंता
ःसंतःशत्रोःसंबंधिन्मन्नवलंभिवस्तामिथ्यातेरिद्धंरूपंमियातिहिंसितयाविसणावस्वविकुर्वेतुविनाशयंत्वित्यर्थः
॥छ॥अथचतुर्थी॥नूदेवासइति।हेदेवासोदेवाःघोलमानाःसभवोयूयंतुअघनोस्मभ्यंवरिवोधनंकर्त्तनकुरुतअयच्छ
ता।मयाविश्वेसर्वेसभवोयूयंसजोषाःसहजीयमाणाःसंतःनोस्माकंअवसेरक्षमाणायभूतभवतअपिचवसवःप्रश राम
स्मासभवःइषमन्नंअस्मेअस्मभ्यंसंदत्तारन्संगयच्छेयुःहेसभवोयूयंअस्मान्सर्वदाकल्याणैरक्षत॥छ॥इतिपंचम ८८
स्यचतुर्थेपंचदशोवर्गः॥छ॥समुद्रज्येष्ठाइतिचतुर्ऋचंसप्तदशंसूक्तंवसिष्ठस्यार्षंत्रैष्टुभमप्देवताकं।तथाचानु

88

न्तां। समुद्रज्येष्ठा आप इति। गतो विनियोगः॥ तत्र प्रथमा॥ समुद्रज्येष्ठा इति। समुद्रज्येष्ठाः समुद्रो ऽर्णः ज्येष्ठः प्र
शस्यतमो यासां ता अपां तः सलिलस्य अन्तरिक्षनाम्नो तत अन्तरिक्षमध्यात् माध्यमिका स्थानात् यन्ति गच्छन्ति। की
दृश्यः पुनानाः विश्वं शोधयन्त्यः अनिविशमानाः सर्वदा गच्छन्त्यः वज्री वज्रभृत् वृषभः कामानां वर्षिता इन्द्रः याः नि
रुद्धा आपः रराद लिलेख खनति देवी देव्य ता आपः इहास्मिन् प्रदेशे स्थितं मां अवन्तु रक्षन्तु अभिगच्छन्तु वा॥ छ
। अथ द्वितीया॥ या आपो दिव्या इति। या आपः अन्तरिक्षभवाः सन्ति। उत वा अपि च या आ। आपः नद्यादिगताः सं
न्त्यः स्रवन्ति गच्छन्ति। याश्च वै खनित्रिमाः खननेन निर्वृत्ताः उत वा अपि च याः स्वयंजाः शोधस्वयमेव गर्त्तं उद्भवं च यन्त्यः समु
द्र एवार्थो गन्तव्यो यासां ताः समुद्रार्थाः शुचयो दीप्तिमूर्त्ताः पावकाः शोधयित्र्यश्च भवन्ति। ता आपो मामवन्त्विति
॥ छ॥ अथ तृतीया॥ यासां राजेति। वरुणः यासामपां राजा स्वामी मध्ये मध्यमलोको याति गच्छति किं कुर्वन् जना
नां प्रजानां सत्यानृते सत्यं चानृतं च अवपश्यन् जानन् निश्चयार्थः। या आपः मधुश्चुतः रसं क्षरं च यः शुचयो दीप्ति
मुक्ताः पावकाः शोधयित्र्यस्ता आपो देव्यो मां रक्षन्त्विति॥ छ॥ अथ चतुर्थी॥ यासु राजेति। अपां राजा वरुणः यासु स्वरू
वन्नीतसाकं सोमः यासु स्वसुवर्णे यासु सुस्थिताः विश्वे सर्वे देवाः ऊर्जं मदन्ति वैश्वानरो अग्निः यासु प्रविष्टः

वे·भा· वाश्चापोदेव्यो इहस्छितं मामस्त्ववंड ॥ छ ॥ इति पंचमस्य चतुर्थे षोडशो वर्गः ॥ छ ॥ आ मां मित्रेति ॥ चतुस्त्वमष्टाद
८९ शं सूक्तं वसिष्ठस्यार्षं चतुर्थ्यातिजगती बृहेनशक्करीवा आदितस्तिस्रोऽनुष्टुभः प्रथमा मामेश वरुणी द्वितीयाग्नेयी तृतीया
वैश्वानरी चतुर्थी गंगादिनदीदेवताका ॥ तथा चानुक्रमणिका ॥ आ मां मैत्रावरुण्याग्नेयी वैश्वदेवी नदीस्तुतिर्जगतमं
त्यातिजगती शक्करी वेति ॥ अस्य सूक्तस्य ऽयूचं विषादिहरणे विनियोगो लिंगादवगंतव्यः ॥ तत्र प्रथमा ॥ आ मां मित्रा
वरुणेति ॥ हे मित्रावरुणौ हे मित्रावरुणौ युवौ इहास्मिन् लोके मां आरक्षतं आभिमुख्येन पालयतं कुलायय त्कुलायं
स्थानं नकुर्वत् विश्वमतः विशेषेण वर्द्धमाना विषं नोस्मान् आ आ अभिमुख्येन मागात् मागमत् मागच्छतु ॥ तथा अजका
वं अजका मा नाम रोगविशेषः तद्वत् दुर्दशीकं दुर्दर्शनं विषं निरोदधीनिरोधत्वं नश्यत्विनिर्यर्थः ॥ तथा सरुः छ आगमी जि
ह्मगः सर्पः इत्यर्थः ॥ मां पदेन पादमवेनरपसारपिः शब्दकर्माशब्देन माविदत् न जानातु ॥ अथ द्वितीया ॥ यद्विजामन्निति
॥ वंदनं एतस्मं सकं यद्विषं विजामान् विविधजन्मानि परुषि षब्दारादीनां पर्वणि मुवता डवेत्य हविषं अष्ठीवंतौ जानुनी
गुल्फौ गुल्फौ च परिदेहत् दिहउपचये उपचितं कुर्यात् अग्निदेवः शोचन् द्दीप्यमानः सन् इतोस्मात् तानानात् तद्विषं अपबा राम
धतां अपहंत्र ॥ शिष्टं व्याख्यातं ॥ छ ॥ अथ तृतीया ॥ यच्छल्मलाविति ॥ यद्विषं शाल्मलौ एतत् संज्ञा कच्छे भवति यद्वि ८९

89

षंनदीषुतत्रस्थास्थास्नुशाद्दुर्भवति।परीतिपंचम्यार्थेऽनुवादीनुषधीभ्यःसकाशाद्यद्विषंजायतेऽस्यपघ्नतेविश्वेसर्वेदे
वाःतद्विषंइतोस्माज्जनान्निर्दशाहानिः।सुवंतुनिःशेषेणाभेरयंतुमामामिति।शिष्टंव्याख्यातं॥छ॥अथचतुर्थी॥याःप्र
वतइति।यानद्यःप्रवतःप्रवणदेशंगच्छंत्यःयाश्चनिवतीरुद्वतःउदकयुक्ताःअनुदकाश्चउदकरहिताःयानद्यःयांति
पयसोदकेनपिन्वमानाःविश्वामायायायंत्यःदेवीर्देव्योद्योतमानाःतानद्यःअस्मभ्यंअशिपदाःशिपदंना
मरोगविशेषःतदकुर्वत्यःसत्यःशिवाःकल्याणोभवंतु।अपिचसर्वानद्यःअशिमिदाःशिमिर्वधनकर्माअहिं
साप्रदाभवंतु॥छ॥इतिपंचमस्यचतुर्थेसप्तदशोवर्गः॥छ॥आदित्यानामितित्र्यृचमेकोनविंशंसूक्तंवसिष्ठस्या
र्षंत्रैष्टुभंआदित्यदेवताकं॥अनुक्रम्यतेच॥आदित्यानांत्र्यृचमादित्यंह्विति॥गतःसूक्तविनियोगः॥आदित्यग्रह
सेवानुवाक्या॥सूत्रितंच॥आदित्यानामवसानूतनेनहोतायक्षदादित्यानामिति॥तत्रप्रथमा॥आदित्यानामि
ति॥आदित्यानांअदितेःपुत्राणांएतत्संज्ञकानांदेवानांअवसारक्षणेननूतनेनहेतुभूतेनेत्यर्थः॥नूतनेनाद्यतनेनशंत
मेनशंसुखंअतिशयेनतत्करणेनशर्मणाशर्मेतिगृहनामैतत्गृहेणसक्षीमहिवयंसंगच्छेमहितुरासःतुराःतु
रिताःआदित्याःश्रोषमाणाःअस्मदीयानिस्तोत्राणिशृण्वंतःयज्ञस्ययष्टारमिमंजनंअनागास्त्वेअनपराधत्वेआ

वे·भा· दितिवे अदीनचेनरथतुस्थापयंतु॥ छ॥ अदित्यासो अदितिरित्यादियहस्पयाज्या॥ सूचितं वा॥ आदित्यासो अदितिर्मादयंता
९० मितिनैतं ग्रहमीलेनहूयमानमिति॥ सैषा सूक्ते द्वितीया॥ आदित्यासइति॥ आदित्यास आदित्यो देवाः अदितिस्तेषां मा
ताचयद्वा अदितिरिति देवविशेषणं॥ अदितिः अदितिः अदितयः अदीनाः रजिष्ठाः अतिशयेन सजवः मित्रः अर्यमा ए
वमेतत्संज्ञकाः मादयंतां हृष्टाः संतु भुवनस्य सर्वस्य जगतः गोपा रक्षका एवंभूता देवाः अस्माकं संतु अस्माकमेव रक्ष
का भवंत्वित्यर्थः॥ अद्यास्मिन् दिने अस्माकमध्वरे रक्षमाणाय सोमममस्माभिरभिषुतं पिबंतु॥ छ॥ अथ तृतीया॥ आ
दित्या विश्वइति॥ आदित्या अदितेः विश्वे सर्वे द्वादशसंख्याकाः अर्काः विश्वे मरुतः सर्वे एकोनपंचाशत्संख्योपेता
विश्वेदेवाः विश्वेदेवा विश्वे सभव इंद्रो अग्निः अश्विना अश्विनौ एतत्संज्ञका एवंभूता ये देवाः तुष्टुवानाः अ
स्माभिः स्तुताः भवंतु सर्वे ते देवाः यूयं सदा सर्वदा नो अस्मान् स्वस्तिभिः कल्याणैः पात रक्षत॥ छ॥ इति पंचमस्य चतुर्थे अष्टा
दशो वर्गः॥ आदित्यासो अदितय इति ऋचात्मकं विंशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं आदित्यदेवताकं आदित्यासइत्य राम
नुक्रमणिका॥ गतो विनियोगः॥ छ॥ तत्र प्रथमा॥ आदित्यासइतिहे आदित्यासः आदित्या देवाः व्यचयेनाघकरान्नवा ९०
भावः॥ यद्वा आचयामि मे आदित्याः तस्येदमित्यर्थे सामान्येवी व्याती सो एप अच्ययः आदित्या नो अशेषभूता वयं अदितयः अख

डनीयाः स्याम भवेम हे देवत्वा हे देवेषु वसवो वामका देवा युष्मदीयं यूः पालनं मर्त्यत्रा मनुष्येषु अस्मासु भवतु हे मि
त्रावरुणौ मित्रावरुणौ सनंतः सुवां संभजंतो क्यं सनेम युवाभ्यां दत्तं धनं संभजे महि हे द्यावापृथिवी द्यावापृथि
व्यौ युवयोः प्रसादात् वयं भवंतो भवेम भूतिमंतः स्याम ॥ छ ॥ अथ द्वितीया ॥ मित्रस्तन्न इति ॥ मित्रो वरुणः अहर्निशा
भिमानिनौ देवौ एतद्द्यावा सर्वे आदित्याः नो अस्मभ्यं वरूथ सिद्धं शर्म सुखं महत् अंहतिर्दीनकर्मा दस्तु गणाः विश्वसार
सकाल देवाः तोकाय अस्मदीयाय पुत्राय तनयाय तत्सुताय च शर्म यच्छंतु ॥ छ ॥ अथ प्रत्यहस्तुति ॥ हे देवा वो युष्म
दीया वयं अन्यजातं अन्येनोत्पादितं एनः पापं मा भुजेम मा भुक्तवंतः स्याम । हे वसवो वामका देवा यद्येन युष्माकं प्रियेण
कर्मणा वयं यष्टे यूयं अस्मान्नाशयत तन्नादृशं कर्म वयं माकं मम मा कार्ष्म लुङि करोते रूपं अमस्य बहुवचनं मंत्रे घसः ह्वरेत्या
दिना च्लेर्लोपः ॥ छ ॥ अथ तृतीया ॥ तुरण्यव इति ॥ तुरण्यवः यज्ञादिकर्मसु त्वरिताः अंगिरसः एतन्नामकाः ऋ
षयः ऽयानाः सवितारं याचमानाः संतः सवितुः देरकस्य देवस्य संबधि रत्नं रमणीयं यद्धनं नक्षंत आश्नुवत । उन्न
राई गतस्तच्छर्दापेत्सयाय छर्दीश ह्रियते यजत्रः यजनशीलः महान् प्रभूतः पिता च वसिष्ठस्य पितृभूतो
वरुणः अयं ह्यसर्वेषां पिता प्रजापतिः विश्वे सर्वे देवाः समनसः समानमनस्काः तन्नादृशं रत्नं नो अस्मान् जुषं

वे॰भा॰ ९१

91

तमेववयंतयद्वानोस्मभ्यंददातु॥छ॥इतिपंचमस्यचतुर्थेएकोनत्रिंशोवर्गः॥छ॥महीद्यावयज्ञेमितिरचात्मकमे
षाविंशंसूक्तंवामदेवस्यार्षंत्रैष्टुभंद्यावापृथिवीयं अनुक्रम्यतेच।मही द्यावाद्यावापृथिवीयमितिचतुर्थेहनिवैश्वदेवशस्त्रे
इदंद्यावाःपृथिव्यमितिविहितंसूत्रितंच।आदेवोयातुमहीद्यावेतितिस्रामित्यमिति।द्यावापृथिव्येपशौवपापुरोडाशयोः
महीद्यावेतिहेसचोयाज्येति।सूत्रितंच।महीद्यावायज्ञैःपृथिवीनमोभिरितिद्वेइति॥छ॥तत्रप्रथमा महीद्यावायज्ञैरिति
।यजत्रेयजत्रीयेवृहतीवृहच्चेमहरचोद्यावापृथिवीद्यावापृथिव्यौद्योतज्ञेयागेःनमोभिःस्तोत्रैश्चअहंस्तोतासबा
धेसबाधश्महितःस्तेत्रिजांसबाधपसुशासंद्यथः।अईतेसकर्षेणस्तोमिमहीमहद्योदेवसुचेदेवाःसुजायद्योस्तेतेवि
हिताद्दश्योस्वत्वपिद्यावापृथिव्यौपूर्वेपुरातनाःकवयःगृणंतस्तुवंतःपुरोदधिरेपुरस्तात्स्थापयामासुः॥छ॥अ
ग्रयेणद्यावाद्यौ।ककपालक्ष्यपूर्वजेइत्याज्या।सूत्रितंच।महीद्यौःपृथिवीचनःप्रपूर्वजेपितरानव्यसीभिरि
ति।सेषासूक्तेद्वितीया।प्रपूर्वजेइति।हेअस्मदीयाःस्तोतारोयूयंनव्यसीभिर्नवतराभिःगीर्भिःस्तुतिरूपाभिर्वाग्भि
स्तस्ययज्ञस्यसदनेस्थानभूतेपूर्वजेपूर्वजाम्नेपितरापितरौविश्वस्यमातापितृभूतेद्यावापृथिव्यौअग्रेरूपेणध्वंपु
रस्कुरुत।अथयस्यप्रस्तरुतिःहेद्यावापृथिवीद्यावापृथिव्यौयुवांदैव्येनदेवसंबंधिनाजनेनसहनोमान्त्रभिस्त्रायथा

राम ९१

तमागच्छतं किमर्थमायातमिति उच्यते वां युवयोः वरूथं अस्माभिर्वरणीयं महि महत्तत्यद्धनमस्तीति शे
षः तद्धनमस्मभ्यं दीयतामित्यर्थः ॥ २ ॥ अथ तृतीया ॥ उतो हि वामिति ॥ उतो हि अपि च खलु हे द्यावापृथिवी द्यावापृथि
व्यौ वां युवयोः सुदासे शोभनदानाय यजमानाय देयानि पूरूणि बहूनि रभधेयानि रमणीयानि यानि धनानि सं
ति भवंति तेषां मध्ये यद्रत्नं असत् अस्कृधोयु रूधुकोहस्कः अस्कृतमनल्पं असत् तद्रत्नमस्मे अस्मभ्यं धत्तं प्रयच्छतं हे द्यावापृ
थिव्यौ यूयं युवां नोस्मान्सर्वदा कल्याणैः पात पालयतं ॥ ३ ॥ इति पंचमस्य चतुर्थे विंशो वर्गः ॥ वास्तोष्पत इति त्र्य
चात्मकमेकविंशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वास्तोष्पत्यं ॥ तथा चानुक्रम्यते ॥ वास्तोष्पते वास्तोष्पत्यमिति ॥ स्मार्ते गृ
हनिर्माणे वास्तोष्पत इति चतसृभिः ऋग्भिः जुहुयात् । सूत्रितं च ॥ वास्तोष्पते प्रतिजानीह्यस्मानिति चतसृभिः प्रत्यृचं जुहो
ति ॥ तत्र प्रथमा ॥ वास्तोष्पत इति ॥ हे वास्तोष्पते गृहस्य पालयितर्देव त्वं अस्मान् त्वदीयान् स्तोतॄन् प्रतिजानीहि प्रबु
ध्यस्व त्वं नो अस्माकं स्वावेशः शोभननिवेशः अनमीवः अरोगकृच्च भव किं च वयं त्वा त्वां यद्धनं ईमहे याचामहे त्वम
पि तद्धनं अस्मभ्यं प्रतिजुषस्व प्रयच्छ ॥ अपि च नो अस्माकं द्विपदे पुत्रपौत्रादिजनाय शं सुखं करो भव चतुष्पदे अस्म
दीयाय गवाश्वादिवर्गाय च शं सुखकरो भव ॥ १ ॥ अथ द्वितीया ॥ वास्तोष्पत इति ॥ हे वास्तोष्पते गृहस्य पालयित

वे॰भा ईदृशंत्वंनोस्माकंप्रतरणःप्रवर्द्धकः गयस्फानःगयस्यास्मदीयस्यधनस्यस्फाययिताप्रवर्द्धकःएधिभव।हेइंदोसोमवदाह्ला
९२ द्कारकतेत्वयासहसख्येसतिवयंगोभिःअश्वेभिरश्वैश्चसहिताअजरासोजरारहिताःप्रवर्द्धकःएधिभव।हेइंदोसोमव
दाह्लादकतेत्वयासहसख्येसतिवयंगोभिःअश्वेभिरश्वैश्चसहिताअजरासोजरारहिताःस्यामभवेमविनाशरहिताइत्य
र्थः।पितेवपुत्रान्यथापितापुत्रान्रक्षकत्वेनसेवतेतथात्वमपिनोस्मान्प्रतिजुषस्वसेवस्व॥३॥अथतृतीया॥वा
स्तोष्पतइति।हेवास्तोष्पतेदेवशग्मयासुखकर्यारण्वयारमणीययागातुमत्याधनवत्यातेत्वयादेययासंसदास्थाने
नसक्षीमहिवयंसंगच्छेमहित्वमपिक्षेमेप्राप्तस्यरक्षणेउतापिचयोगेअप्राप्तस्यप्रापणेवरंवरणीयंनोस्मदीयंधनंपाहि
रक्षहेवास्तोष्पतेयूयंत्वंनोस्मान्सर्वदाकल्याणैःपातपाहि॥३॥इतिपंचमस्यचतुर्थेएकविंशोवर्गः॥३॥अमीवहे
त्यष्टर्चंद्वाविंशंसूक्तंआद्यागायत्रीद्वितीयाद्यास्तिस्रोनुष्टुभःपंचम्याद्यास्तिस्रउपरिष्टाद्बृहत्यःअष्टकाचतुर्थीद्वाद
शकीबृहतीतिउक्तलक्षणोयोगः।आद्यायावास्तोष्पतिर्देवताकाशिष्टावैन्द्यःतथाचानुक्रांतं।अमीवहाष्टौवास्तोष्पत्याद्या
गायत्रीशेषास्त्र्यःपरिष्टाद्बृहत्यास्तिस्रोनुष्टुभइतिप्रस्वापिन्यउपनिषदितिगतोविनियोगः।बृहद्देवतायांतुतदिहलि राम
ख्यते।वरुणस्यगृहान्रात्रौवसिष्ठःस्वप्नमाचरन्।प्रविवेशाथतंतत्रश्वानदन्नभ्यवर्त्ततताकंदंतसारमेयंसध्वंसंतेहृष्ट ९२

92

मुषतां यदर्जुनेति चद्वाभ्यां सांतयि त्वंघ सुषुपत्॥ एवं प्रस्वापया मासजनमन्यं च वारुणमिति। अत्र केचि
त्पुनरेवमाहुः आसां प्रस्वापिन त्वंतु कथा सुपरिकल्प्यते। वसिष्ठस्तु ऋषितो न्नाथ्यी त्रिरात्रालब्धभोजनः। चतुर्थेन
त्रो चौर्यार्थं वारुणं गृहमेयतु। कोष्टागारे प्रवेशाय पालकव्याप्रिसुप्तये यदर्जुनेति सप्तर्चं ददर्श च जजाप चे
ति॥ छ॥ तत्र प्रथमा॥ अमीवहेति हे वास्तोष्पते गृहस्य पालक एतत्संज्ञक देव अमीवहा। अमीवानां रोगाणां
नाशकस्त्वं विश्वा विश्वानि बहूनि रूपाणि आविशन् प्रविशंस्त्वया यद्रूपं कामयते तत्तद्देवाविशतीति यावत्। नः
ऽस्माकं सखा मित्रं भूतः सुशेवः सुष्ठु सुखकरः एधि भव॥ छ अथ द्वितीया॥ यदर्जुनेति। हे अर्जुन श्वेत
हे सारमेय सरमानाम देवशुनी तस्याः कुलोद्भव हे पिशंग केषु चित्ति देगेषु पिंगलवर्ण एवंभूत हे शुनक त्वं द
तो दंतान् यद्यच्छसे विस्तृणोषि बिभ्रसमानं तु उष्टिमिस्पर्थः। तदानीं। वीव भ्राजंत ऋष्टयः यथा आयुधानि वि
शेषेण भासंते तथा उपास्य समीपे वसतः भक्षयतस्तव दंताः स्रक्वेषु स्रक्कासु भासते स्रक्काशब्दस्तु ओष्ठप्रदेश
विशेषवाचीत्यर्थः। तथाभूतस्त्वं दुष्टरां गीसुष्ठु निःस्वप नितरां निद्रां कुरु॥ छ॥ अथ तृतीया॥ स्तेनं रायेति। हे श्व
न्सरयत मेव देशं पुनरस्तीति पुनः सस्नात् सृत हे सारमेय त्वं स्तेनं प्रच्छन्नधनापहारिणं तस्करं अन्य यदंध

वे·भा नापहारीतस्करःतंवारायसगच्छइहसालाःस्तेनस्मान्किंशयसिगच्छसिअस्मानुदुच्छुनायसेकिंबाधयसे
९३ सुखपयन्यंतनिद्रांकुरु॥४॥ अथचतुर्थी॥ त्वंसूकरस्येति। हेसारमेयत्वंसूकरस्यवराहस्यहितीयार्थेच
तुर्थी॥र्थेषष्ठी॥ दर्द्दहिविदारयसूकरोपित्वदर्द्दर्तुविदारयतुयुवयोर्नित्यवैरत्वात्। अस्मान्मादशेत्यर्थः।स्तो
तॄनित्यर्द्धर्चःपूर्ववत्सामुचित्याख्यातः॥छ॥ अथपंचमी॥ ससुमातेति। हेसारमेयमातात्वदीयाजननीससुस्त
93
पतुपिताचससुश्वासारमेयोभवान्ससुविश्पतिर्ज्येष्ठमातायद्वाविशांजनानांपालकोगृहीससुस्वपतु॥छ॥अ
थषष्ठी॥यआस्तइति।योजनआस्तेअस्मिन्प्रदेशोतिष्ठतियश्चचरतिगच्छतियश्चजनःनोस्मान्पश्यतिएवंभूता
नांतेषांजनानांआक्षाणिइन्द्रियाणिसंहन्मःसंहनामसंहत्यनिर्निमीलतंनिमीलयामइत्यर्थः।इदंप्रत्यक्षेणोपलभ्यमा
नंहर्म्यंप्रासादादिरक्षावरात्मकंवस्तुजातंयथानिश्चलंभवतितथासर्वेइमेजनाः निश्चलाभवंत्वित्यर्थः॥छ॥अ
थसप्तमी॥सहस्रशृंगइति।सहस्रशृंगःसहस्रकिरणःवृषभःकामानांवर्षितायःसूर्यःसमुद्रात्उदधेःसकाशात्उ राम
दाचरत्उदगच्छति।सहस्येनअभिभवित्रातेनसूर्येणवयंस्तोतारःजनान्सर्वान्निष्वापयामसिनितरांस्वापयामः ९३
यामः॥छ॥अथाष्टमी॥प्रोष्ठेशयाइति॥याःयाःतल्पशयाःनारीर्नार्यःस्त्रियःप्रोष्ठेशयानाःयावह्येशयाःसंवाहनंतासां

नूशयानीः यास्तल्पशीवरीः तल्पशायाः याः स्त्रियः पुण्यगंधाः ताः स्तादृशीः सर्वाः स्त्रिः स्वापयामसि वयं निद्रां कार
यामः ॥ छ ॥ इति पंचमस्य चतुर्थे द्वाविंशो वर्गः ॥ छ ॥ इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे दाशतय्याः
सप्तमे मंडले तृतीयोनुवाकः ॥ छ ॥ अथ चतुर्थेनुवाके पंचदश सूक्तानि तत्र कईव्यक्ता इति पंचविंशत्यृचं प्रथमं
सूक्तं वसिष्ठस्यार्षं मरुद्देवताकं आद्याएकादश द्विपदाविराजः विंशी चतुर्दश त्रिष्टुभः तथा चा
नुक्रांतं ॥ कईं पंचाधिका मारुतं ह आद्याएकादश द्विपदा इति ॥ दशरात्रे चतुर्थेहनि आग्निमारुत शस्त्रे इदं मा
रुतं निविद्धानं सूत्रितं हि ॥ वैश्वानरस्य सुमतौ कईंव्यक्ता नरइति ॥ छ ॥ तत्र प्रथमा ॥ कईंव्यक्ता इति ॥ व्यक्ताः कां
तियुक्ताः नरो नेतारः सनीलाः समानीलाः रुद्रस्य महादेवस्य पुत्राः मर्याः मर्त्येभ्यो हिताः अध अपि च स्वश्वाः
शोभनवाहाः ईइमे एवंभूतान् के भवंतीति निरूपातिशयाइषिराश्चर्येणाह ॥ छ ॥ अथ द्वितीया ॥ नकिर्ह्येषामिति
॥ एषां मारुतां जनूंषि जन्मानि न किः हि वेद कश्चिदपि न खलु जानातीति तादृशाः मरुतः मिथः परस्परं ज
नित्रं रुद्रस्य पृश्निश्च सकाशात् प्रादुर्भूतं स्वकीयं जन्म अंग विद्रे स्वयमेव विदंति ॥ छ ॥ अथ तृतीया ॥ अभि स्वपू
भिरिति ॥ मरुतः स्वपूभिः स्वकीयैः पवनैः संचरणैः स्वयमेव संचरंतः मिथः परस्परं अभिपंत संगच्छंते अपि च

व

वे·भा· वातस्वनसःवायुवत्स्वनंतःशाश्वायमानाःश्येनाःश्येनाइवगताविविधानोरूपंगमनशीलाःयद्वाश्येनइति
९४ लुप्तोपममेतत्।श्येनाःपक्षिणःनहिगच्छंत्यःअस्पृधन्परस्परंरूपसौंदर्यादिभिःस्पाईता॥छ॥अथचतुर्थी
॥एतानीधीरइति॥धीरोधीमानुशास्त्रज्ञोजनःनिण्यानिश्वेतवर्णानिएतानिमारुतात्मकानिभूतानिचि
केतजानीयात्किंतुनसर्वेजनाजानंतीत्यर्थः॥महीमहतीपृश्निर्मरुतांजननीयत्यानिमरुदात्मकानिभू
तानिऊधःऊधस्यंतरित्स्वकीयेजठरेवाजभारःबभारएतानिचिकेतेतिपूर्वेणसंबंधः॥छ॥अथपंचमी॥
साविड्गुवीरेति॥साविट्साप्रजामरुतःपरिचरतिसाप्रजामरुद्भिर्हेतुभिःसनात्चिरात्सहंतीशत्रूनभिभव
तितुक्षुधनंबलंवापुष्यंतीलभतीसुवीराशोभनपुत्रयुक्तासुभवतु॥छ॥अथषष्ठी॥यामंयेष्ठाइति॥
मरुतःयामयातव्यंगंतव्यंप्रदेशंयेष्ठाःयातृतमाःअतिशयेनगंतारःसुभाःअलंकारेणशोभिष्ठाःअतिश
येनशोभासुक्ताःश्रियाकांत्यासंमिश्लाःसंगच्छमानातुजोभिर्बलैःउग्राउद्गूर्णाएवंभूताभवंतीतिशेषः॥छ॥अ राम
थसप्तमी॥उग्रंवइति॥हेमरुतःवोयुष्माकंतुग्रंतेजःउग्रमुद्गूर्णंभवतुशवांसियुष्मदीयानिबलानिस्थिराणिस्थि ९४
राणिकेचिदनपहर्त्तव्यानिभवंतु।अधअपिचनरुद्भिर्गणःमरुतांसंघःतुविष्मान्वृद्धिमान्भवतु॥छ॥अ

थाष्टमी॥ सुभ्रोवइति॥ हेमरुतः वो युष्माकं सुष्मोबलं सुभ्रः सर्वतः शोभमानं। किंचवो मनांसि क्रुध्मी सं
ग्रामेषु शत्रुहननार्थं क्रोधशीलानि धृष्णोर्धर्षणशीलस्य शर्द्धस्य बलवतो युष्मदीयस्य गणस्य धुनिः वृ
क्षादीनां कंपयितुर्वेगः मुनिरिव मननस्य मुनिः स्तोता मस यथा बहुविधं शब्दमुत्पादयति एवं बहुशब्दस्योत्पाद
कइत्यर्थः॥ छ॥ अथनवमी॥ सनेम्यस्मदिति
॥छ॥ अथैकादशी॥ स्वायुधासइति॥ स्वायुधासः स्वायुधाः शोभनायुधाः इष्मिणो गंतारः सुनिष्काः शोभनालं
काराः उतापिच तन्वः स्वकीयानि शरीराणि शुंभमानाः स्वयमेव शोभयंतो मरुतः एवंभूता भवंतीत्यर्थः॥ मारु
तेपर्णौ शुचिवोहव्याइतिवर्गा याश्रनुवाकः॥ सूक्तिनं च। शुचिवोहव्यामरुतः शुचीनां नू ष्टिरं मरुतः इति॥ छ॥ तत्रै
काद्वादशी॥ शुचीवइति हेमरुतः शुचीनि हव्यानि हवींषि भवंतु शुचिभ्यः प्रकाशमानेभ्यो युष्मभ्यं शुचिं शुद्धं अ
ध्वरं यागं हिनोमि अहं प्रेषयामि सत्यसापः ऋतमुदकं स्पृशंतो मरुतः सतेन सत्येनैव सत्यमायन् गच्छंति कीदृशाः शु
चिजन्मानः शोभनजननाः शुचयो दीप्यमानाः पावकाः शोधकाः एवंभूता गच्छंतीत्यर्थः॥ छ॥ अथत्रयोदशी॥ अंसे

वे भा ॥ त्ति। हे मरुतः अस्मेषु दीयुष्मंकं यथा हे युष्माकं स्वाद्यो लंकार विशेषाः आमुक्ता भवंतीति शेषः। सुरुक्माः सुसुष्ठु रोचमा
९५ नाः हाशः वो युष्मदीयं वक्षःस्थलेषु देशं उपशि श्रियाण्णः आश्रिता भवंति। किंच हे मरुतः रष्टिभिः वर्षैः साईं वि
घ्नौनवादितो यथा रुचानाः रोचमानाः। ताहश्च्रूतायूयं आयुधेर्मेर्मुवताडनैः स्वधामुदकं अनुयच्छमानाः प्रयच्छंतो
95
विरथेति शेषः॥ छ॥ गृहमेधीयेसूक्तबुध्नावइति॥ गधमनस्यया ज्यासूक्ति विततं च॥ प्रबुध्नावईरते महांसीति पुष्टिमं
तो विराजेसंयाज्ये इति॥ मेषा सूक्ते चतुर्दशी॥ प्रबुध्नावइति। हे मरुतः वो युष्मदीयानि बुध्ना बुध्नान्यंतरिक्षेम
वानि महांसि तेजांसि प्ररते प्रकर्षेणगच्छंति। किंच हे प्रयज्यवः प्रकर्षेण यष्टव्या मरुतो यूयं नामानि पांसून्नमयं
तीनिनामान्यूदकानि तिरश्चं वर्द्धयत॥ हमरुतो यूयं सहस्रियं संख्याकं दम्यं दमे गृहे भवं गृह मेधीयं गृहमेधीयगु
णेभ्यो युष्मभ्यं देयं एतं एतादृशं भागं जुषध्वं सेवध्वं एकं भागं सहस्रियमिति कथमाह॥ तथा च श्रूयते। याव
देकादेवता कामयते यावदेकाना वादाहत्ति अथ तेन हितदृष्टियशावदेवस्यात् यावज्जुहोतीति। छ॥ अथपं राम
चदशी॥ यद्विसुतस्येति॥ वाजिनो हविर्लक्षणान्नवतः विप्रस्य मेधाविजो मम संबंधि निहवी मनूहविर्मन्निहवि ९५

षासुक्तेस्तोत्रेक्रियमाणेसतिहेमरुतोयूयंयदियस्मात्कारणात्स्तुतस्यस्तुतंमदीयंस्तोत्रंशृणुतइत्थमनेनप्रका
रेणाधीथअवगच्छथतस्मात्कारणात्हेमरुतोयूयंसुवीर्यस्यशोभनपुत्रोपेतस्यरायःरायधनानांद्वितीयार्थेषष्ठी
मन्तुशीञ्चंदातदत्तअरावाअरातिःशत्रुभूतःअन्योजनःयंरायंनविदाहभनंनेवाभिहन्यात्तद्धनमस्मभ्यंदत्तेतिसं
बंधः॥छ॥इतिपंचमस्यचतुर्थेचतुर्विंशोवर्गः॥मरुत्वक्रीळिन्यःमत्तकपालमित्यस्याअयासमिमिन्नियाज्या॥सू
त्रितंच॥अयासोनयेमरुतःस्वंचोनुष्टोदमूर्वाइति।मेषासूक्तेषोडशी॥अयासोनयइति।अयासोनअयासःसंतत
गामिनोश्वाइवस्वंचःसुष्टुगाःछौवायेमरुतःयक्षदृशोनमर्याःयक्षःस्पोसर्वस्पृष्टस्वराःमनुष्याइवशुभयंतःशोभंतेहे
र्म्येष्ठाःहर्म्येस्थिताःशिशवोनकुमाराइवशुभ्राःशोभमानावत्सासोनवत्साइवप्रकालिनःप्रकर्षेणक्रीडमानाम
वेमहृतःपयोधाःपयसउदकस्यधारयितारोदातारोवाभवंति॥छ॥अथसप्तदशी॥दशस्यंतइति॥मरुतःनोस्मभ्यं
दशस्यंतःधनानिप्रयच्छंतःसुमेकेसुरूपेरोदसीद्यावापृथिव्यौवरिवस्यंतःस्वमहिम्नापूरयंतःमलंतुमलंतुअस्मा
न्सुखन्तुसुखकरान्स्तुकानूकुर्वंतु॥अपिचहेवसवोवासकामरुतःगोहागवांमेघस्थानांमुदकानांभेदकाकन्न्ह
हान्दणांशत्रूणांहंतावोयुष्मदीयंवधःआयुधंआरेअस्मत्सुअस्मत्तोराद्दूरेभवतु॥यूयंमापिसुम्नेभिःसुखैःमह

96

अस्मे अस्मासु नमस्वं स्वयमेवाभिमुखा भवत ॥ छ ॥ मारुते पशो आ वो होतेत्यनुक्ता स्विष्टकृतं च । आ वो होता
जोहवीति सत्तः अपि चित्रकर्मं गृणते तुरायेति ॥ सैषाष्टादशी ॥ आ वो होतेति ॥ हे मरुतः सत्तः होता निष-
ण्णोस्मदीयो होता सत्राचीं सर्वतो गमनशीलां रातिं त्वदीयं दानं गृणानः स्तुवन् वो युष्मान् आ जोहवीति भृश-
माह्वयति हे वृषणः कामानां वर्षितारो मरुतः यो होता ईवतो गच्छतो व्यापारवतो यजमानस्य गोपा अस्ति यु-
ष्मदाह्वाननिमित्तेन रक्षको भवति स होता अद्वयावी मायारहितः सन् युष्मान् । वः उक्थैः स्तोत्रैर्हवते स्तौति ॥ छ
॥ अथैकोनविंशी ॥ इमे तुरमिति ॥ इमे तुरमिति । ईदृशो मरुतस्तुरं कर्मसु त्वरितं यजमानं रमयन्ति क्रीडयन्ति । इमे
मरुतः सहः सहसा बलेन सहस्वो बलवतो जनान् आनमन्ति । इमे मरुतः स्वनुष्यतो हिंसकात् पुरुषात् शंसं शंसकं स्तो-
तारं निपान्ति नितरां पालयन्ति । अररुषे हविरप्रयच्छते जनाय गुरुं महान्तं द्वेषः अप्रियं दधति कुर्वन्ति ॥ छ ॥ अ-
थ विंशी ॥ इमे रध्रमिति ॥ इमे मरुतः रध्रं चित् समृद्धमपि जनं जुनन्ति प्रेरयन्ति भृमिं चित् भ्रमणशीलमपि दरि- राम
द्रं जुनन्ति प्रेरयन्ति वसवो वासकाः देवाः युष्मान् यथा जुषन्त कामयेरन् हे वृषणः कामानां वर्षितारः ते यूयं तमां- ९६
सि अपबाधध्वं विनाशयत । अपि च अस्मे अस्मभ्यं विश्वं बहुलं तोकं पुत्रं तनयं पौत्रं च धत्त प्रयच्छत ॥ छ ॥ इति पंच

तमस्य चतुर्थे पंचविंशोवर्गः॥छ॥अथैकविंशी॥मावोदात्रादिति॥हेमरुतः वोयुष्माकंदात्राद्दानात्मानि
रराम वयंमानिर्गमाम यूयंमस्मान्परित्यक्तान्येभ्योधनंमादत्तेत्यर्थः॥हेरथ्याः रथवंतोमरुतः विभागेयु
ष्मदीयधनस्यदानेपश्चान्मादघ्मदघ्मनिर्गतिकर्मा वयंपश्चाद्भागिनोमाभूम॥यूयंअथममस्मभ्यंमेव
दत्तेतियावत्स्पार्हेस्पृहणीयेवसव्येधनसमूहेयूयंनोस्मान्आभजतनभागिनःकुरुतेतिसंबंधःई
मितिपूरणः॥छ॥अथद्वाविंशी॥संयद्घनंतेति॥यद्यदाशूराविक्रांताजनाःसोजनाःयह्वीषुमहतीषु
उषधीषुविक्षुप्रजासुतनजेतथासुप्रजामन्युभिःकोपैःअभिमानैर्वासंहनंतसंगच्छंते॥अधतदानींहेरु
द्रियासोरुद्रपुत्राहेमरुतःयूयंपृतनासुयुद्धेषुअर्यःअरेःशत्रोःसकाशात्नोस्माकंत्रातारोभूतरक्षका
भवत॥छ॥अथत्रयोविंशी॥भूरिचक्रेति॥हेमरुतोयूयंभूरिभूरीणिबहूनिपत्र्याणिअस्मत्पितृसं
बंधीनिधनदानादीनिकर्माणिचक्रकृतवंतोभवतपुराचित्पूर्वकालेपिवोयुष्माकंउक्थानिशस्त्रा
णियानिकर्माणिप्रशस्यंतेशस्यंतेतानिचक्रेतिसंबंधः॥उग्रतुजस्वीएतान्नामसुयुद्धेमरुद्भिर्युष्माभि
र्हेतुभिःसाल्हाशत्रूणामभिभविताभवतिमरुद्भिरितमरुद्भिर्युष्माभिरेवहेतुभिःस्वर्वान्नोत्रैरभिगंता

वे·भा
९७
97

त्रा जनमन्नं सनितारं भरन्ता मतिः। यद्वा अर्वा अश्वः वाजं युद्धं सनिता भवति॥ छ॥ अथ चतुर्विंशी॥ अस्मे वी
र इति॥ हे मरुतः अस्मे अस्माकं वीरः पुत्रः शुष्मी अस्तु बलवान् भवतु असुरः प्रज्ञावान् यो जनानां शत्रूणां
विधर्ता विधारकः येन पुत्रेण वयं सुक्षितये सुष्ठु निवासाय अपः आप्नुवन्तः शत्रून् तरेम हिंसेम। सपुत्रो
कलत्रान् इति पूर्वेणान्वयः॥ अध अपि च वो युष्मदीयं वयं स्वम् ओकः आत्मीयं स्थानं अभि स्याम अति
थेम॥ छ॥ अथ पंचविंशी॥ तन्न इंद्र इति॥ पूर्वं व्याख्यातेयं। अत्र सरार्थस्तु इंद्र इत्यादयो देवाः अस्मदीयं स्तोत्रं सेवंता
मरुतां सुप्रस्थाने वर्तमाना वयं सुखे स्याम हे मरुतो यूयं सर्वदा अस्मान् विनाशेः पालत॥ छ॥ इति पंचम
स्य चतुर्थे षड्विंशो वर्गः॥ छ॥ मध्वो व इति सप्तर्चं द्वितीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं मरुद्देवताकं। मधः स-
प्ते च अनुक्रान्तं दशरात्रे षष्ठेहनि आग्निमारुत इदं मारुतं निविद्धानं। सूत्रितं च। मध्वो वो नाम सप्तथेते वा
माग्निमारुतमिति॥ तत्र प्रथमा॥ मध्वो व इति॥ हे यजत्रा यजनीया मरुतः वो युष्मदीयं मारुतं मरुत्संबंधि राम
नाम नामधेयं मध्वः मधवो मादयितारः स्तोतारः यज्ञेषु यागेषु शशमाः बलेन गमयंति प्रकर्षेण स्तुवं ९७
ति उद्वै स्तुवंतीत्यर्थः॥ ये मरुतः उर्वी विस्तीर्णौ रोदसी द्यावापृथिव्यात गिरेजयंति निकंपयंति। किं च उग्रं मेघं

पिन्वंतिवर्षयंतिउर्योऽद्रूर्म्यावतयेमरुतः अयासुःयांतिसर्वत्रगच्छंति।तेषांमरुतांयुष्माकंनामअमदं
तीतिपूर्वेणान्वयः॥छ॥ अथद्वितीया॥निचेतारइति।येमरुतःमरणंतंस्तुवंतंजनंनिचेतारोहिंसगय
माणामंति।अपरोभृइ चः सत्यसंस्कृताः हेमरुतोयूयंपिशियाणाः शीयमाणाःसंतःअघास्मी॥नूदिवसे
अस्माकंविदथेषुयज्ञेषुवीतयेसोमस्यभक्षणायबर्हिषिकुशमयेआसदनआसीदतउविशत॥
छ।अथतृतीया॥नैतावदन्यइति।इमेईदृशामरुतोयथायत्परिमाणंधनादिकंददाति॥अन्येमरुद्भ्यो
तिरिक्तादेवाःएतावद्धनादिकंनाददाति इत्यर्थः॥तेचंरुकौरोचमानैरायुधैराभरणैःस्वकीयाःस्वैःतनूभि
रात्मीयैःकेवलैरंगैःस्वभ्राजंते।सर्वदाभासंते।कश्चिदेकवाक्यतामाह।येमेमरुतोरुक्मादिभिःभाजंतेनैवाव
देतद्यतिरिक्तम्भ्राजंतइति।अपिचरोदसीद्यावापृथिव्यौविशानाःप्रकाशयंतःविश्वपिशःआपूरीत्यःएवं
भूतामरुतःशुभेशोभायैसमानंसदृशरूपंअञ्जिआभरणंआअंज्यतेस्वकीयावयवेषुअभिव्यक्तीकुर्वं
तिकमितिपूरणः॥छ॥अथचतुर्थी॥सधकुस्मावइति।हेमरुतःअपराधंपुरुषतापुरुषतयामनुष्यत्वेन
करामकरवाममनुष्याणांहिशमदस्तुलभस्यर्थः।हेयजत्राःयजनीयाःमरुतःवोयुष्मदीयांयातस्यांदि

98

घ्नतिश्चपिद्रुषद्दपिमाभूमचनिराश्रन्नवन्नमाश्चतिशयेनान्नप्रेत्यर्थः।नोस्मदीयासुमतिस्तुबुद्धिः
अस्मेअस्मासुस्तु॥छ॥अथपंचमी॥ऋतेचिदिति॥अत्रास्मिन्नस्मेतेचित अस्मदीयेयज्ञकर्मण्येवमरु
तोरण्णेंतरमंतांकीदृशामरुतः अनवद्यासः अनिंदितास्तुचयोदीप्तियुक्ताः पावकाः शोधकाः एवंभूताइति
॥किंचहेमरुतान्यजत्रायजनीयायूयंनोस्मान्सुमतिभिस्तुग्रहबुद्धिभिः सुष्टुतिभिर्हेतुभिर्वायावतमक
र्षेणपालयततथानोस्मान्वाजेभिर्वाजैरन्नैः पुष्यसेषार्यप्रतिरातप्रवहुयत॥छ॥अथषष्ठी॥उतस्तुता
सइति॥उतापिचस्तुतासः एवमस्माभिस्तुताः मरुतः हवींषिव्यंतुभक्षयंतुकीदृशाः विश्वेभिर्विश्वैः नाम
भिरुद्रकैः सहितानरोलेतारः शेषः अथयन्नस्तुनः हे मरुतः नोस्मदीयायेप्रजायेसंततयेअमवस्यअमृतमुद
कंदत्तात्तत्तातथाहविषादातुर्यजमानस्यसूनृतासूनृतानिसुष्टुरच्यंतिशोभनयोग्यानिमघानिधना
निजिगृतउद्गिरतप्रयच्छतेत्यर्थः॥छ॥अथसप्तमी॥आस्तुतासइति॥हेमरुतः स्तुतासः एवमस्माभिः स्तु
ताः विश्वेसर्वेयूयंऊतीऊत्यारक्षयासहिताः सूरीन्स्तोतृन् अच्छाभिः लक्ष्यअमर्वतानामर्वतानोययले राम
आजिगतआगच्छतायेमरुतः त्मनाआत्मनैवनोस्मान्शतिनः शतसंख्याकान्वहयंतियथावयंपुत्रपौ ९८

त्रादिभिः शक्तिभोऽभवे मतद्यावद्भूयंतीत्यर्थः। ते यूयं समानि गातेति पूर्वेण संबंधः एवंभूता मरुतो यूयं सर्वदा
स्मान्पालयत॥ ७॥ इति पंचमस्य चतुर्थे सप्तविंशो वर्गः॥ प्रसाकमुक्षे इति षल्चं तृतीयं सूक्तं वसिष्टस्यार्षं
त्रैष्टुभं मरुद्देवताकं। अनुक्रांतं च। प्रसाकमुक्ष ललिति गतो विनियोगः॥ तत्र प्रथमा। प्रसाकमुक्षे इति हे
स्तोतः शोर्यूयं साकमुक्षे संततं वर्षित्रे गणाय मरुतः समुहाय प्रार्चत। स्तोत्रं प्रोच्यद्ध्यो मरुद्गणः देवस्य देवदेव
संबंधे धामन् स्वर्गाख्यस्य स्थानस्य तु विष्मान्वृद्धिमान्भवति सर्वेभ्यो देवेभ्यः प्रवृद्ध इत्यर्थः। तस्मै गणायेति
पूर्वेण संबंधः उताऽपि च मरुतः महित्वा स्वकीयेन महत्त्वेन सहिताः रोदसी द्यावापृथिव्यौ सो दंति भजंति तथा
निर्ऋतेर्भूमेः अवंशात् अंतरिक्षात् अनाकं स्वर्गेन संनेघानुवंति॥ ७॥ अथ द्वितीया। जनूश्चिद्व इति। हे भीमा
सोभीमाः तु विमन्यवः प्रवृद्धमन्यवः अयासो गंतारः इनिब्जी णिसंबंधि नानि। एवंभूता हे मरुतः वो युष्माकं
जनूः जन्म त्वेष्येण दीप्तेन रुद्रेण बभूवेति शेषः उतापि च ये मरुतः मरुतः महोभिः तेजोभिः ज्ञसा बले
न प्रतिप्रभवंति। ते यो वो युष्माकं यामन् यामनिगमने विश्वः स्वर्दृक् सूर्यस्य द्रष्टा सर्वो जिवे समूहाः। यद्वा स्व
र्दृशि स्वं तत्प्रश्यतीति स्वर्दृक् सर्वद्रष्टा निष्टणि सर्थः। भयते बिभेतेति॥ ७॥ अथ तृतीया॥ बृहद्वयति

वे॰भा हे मरुतो यूयं मघवद्भ्यो हविर्लक्षणान्नवद्भ्यो ऽस्मभ्यं बृहन्महत्सुवीरं रक्षन्तः प्रयच्छत नोऽस्मदीयां सुष्टु॰तिं शो
९९ भनं स्तोत्रं जुजोषन्नित्सेवतामेव गतो मरुद्भिः प्राज्ञः अध्वमार्गः जंतुं प्राणिनं न विहिनाहंति ऽद्रकेनाथायय
त्येव यद्वाविनिरनिर्वर्ईनार्थः नेति चार्थे नेति चार्थे मरुद्भिर्मनो मार्गः स्वजं लुं वईयति। तथा नोऽस्मान् स्पार्हाभिः
स्पृहणीयाभिः ऊतीभिः रक्षाभिः प्रतिरेत प्रवर्द्धयत॥ छ॥ अथ चतुर्थी॥ युष्मोतो विप्र इति। हे मरुतः युष्मो
तः युष्माभिः रक्षितः विप्रः स्तोता शतसंख्योपेतधनवान्भवति। युष्मोतः युष्माभी रक्षितः अर्वा अभिगंता सह
99 रिः शत्रूणामभिभविता स्तोता सहस्री सहस्रधनवान्भवति। युष्मोतः युष्माभी रक्षितः संम्राट् साम्राज्ययुक्तो
भवति। उतापि च वृत्रं शत्रूं हंति युष्मद्दत्तः कोऽस्तिहे धूतयः कंपितारो मरुतः वो युष्माभिर्दत्तं तत्प्रसिद्दे स्वं
धनं प्रास्तु प्रभूतं भवतु॥ छ॥ अथ पंचमी॥ ता ॐ आ रुद्रस्येति। मीळ्हुषः कामानां वर्षितुः रुद्रस्य स्वरस्य तु
चान्तान्मरुतः आ विवासे अहं होता परिचरामि ते मरुतः नोऽस्मभ्यं कुवित् बहुवारं पुनः भूयः नंसंते नबं राम
तां अभीमुखी भवंतु। कुवित् इत्येव पुनः शब्दार्थस्य लब्धत्वात् पुनः शब्दग्रहणं किमर्थं आदरार्थं। यस्त्व ९९
र्तं अंतर्हितेन अप्रकाशेन यत् येन एनसा जिहीळिरे मरुतः क्रुद्धाः आविः प्रकाशेन यत् येन एनसा च

जिल्हीहीरेजुराणां मरुतां संबंधितदिमयमेनोपराधं अवईमहे स्तोत्रेणावयमपनयामः॥ छ॥ अथ षष्ठी॥ प्र सा
वाचीति। मघोनां धनवतां मरुतां संबंधिनी सुष्टुतिः या शोभना स्तुतिः अस्मिन् सूक्ते कृता सा स्तुतिः अस्माभि
र्वाप्तिशोभासीत् मरुतः इदमीदृशं सूक्तं जुषंत सेवतां हे वृषणः कामानां वर्षितारो यूयं द्वेषो द्वेषांसि शत्रू
न् आराच्चित् दूरादेव युयोत अस्मत्तः पृथक्कुरुत यूयं नोस्मान् स्वस्तिभिः सर्वदा रक्षत॥ छ॥ इति पंचमस्य चतु
र्थे षड्विंशो वर्गः॥ छ॥ यं त्रायध्व इति द्वादशर्चं चतुर्थं सूक्तं। अत्रेयमनुक्रमणिका॥ यं त्राय ध्वे द्वादश त्रिग गा
थ्याद्विनवमाद्यास्त्रिष्टुभो गायत्र्यो यानुष्टुब्जोदीमृत्युविमोचनीति। आद्या द्वतीया पंचम्यो बृहत्यः द्वितीया च
तुर्थी सप्त्यः सतोबृहत्यः सप्तम्यष्टम्यावनुक्रमशः त्रिष्टुभौ नवमी दशम्येकादश्यो गायत्र्यः द्वादश्यनुष्टुप् सा चारु
द्रदेवता काशिष्टामारुत्यः सूक्तविनियोगो लैंगिकः॥ छ॥ तत्र प्रथमा॥ यं त्रायध्व इति। हे देवासो देवाः इदमिदं इ
तो भयहेतोः यं स्तोतारं त्रायध्वे पालयध्वे यं च स्तोतारं नयथ सन्मार्गं प्रापयथ। हे अग्ने वरुण मित्र अर्यमन् हे म
रुत एवंभूता हे देवाः तस्मै स्तोत्रे शर्म सुखं यच्छत दत्त॥ छ॥ अथ द्वितीया॥ युष्माकं देवा इति। हे देवाः युष्माकं युष्मदी
येन अवसा रक्षणेन प्रिये अहनि सर्वेषां देवानां प्रियभूते सुन्याभिधाने दिवसे ईजानः इष्टवान् जनः द्विषः शत्रून् तर

वे॰भा॰ रतिआकामतिसययजमानःस्वयंस्वकीयंनिवासंअतोऽववर्द्धयतियोयजमानःवोयुष्मभ्यंमहीःमहांतिइषः
१०० हविर्लक्षणान्यन्नानिवरायनिवारणायपूर्वंनाम्यन्वगच्छत्अस्मदीयान्येवहवींषिस्वीकुरुतेनिरोधनंकर्तुंवि
दाशतिविशेषेणददाति॥अतएवसस्वकीयंनिवासंवर्द्धयतीत्यर्थः॥छ॥अथतृतीया॥नहिवश्चरमंचन॥व
100 सिष्ठःसुक्षिःवोयुष्माकंमध्येचरमंचनअवरमपिनहिपरिमंसतेवर्जयित्वानास्तौतिकिंतुसर्वानेवयुष्मान्
स्तौतीत्यर्थः॥अद्यास्मिन्नहनिअस्माकमस्मदीयेसुतेसोमेअभिषुतेसतिहेमरुतःकामिनःसोमंकामयमानः
विश्वेयूयंमेचासंगच्यपिबतपानंकुरुत॥छ॥अथचतुर्थी॥नहिवऊतिरिति॥हेमरुतःवोयुष्मदीयाऊतीरक्षा
पृतनासुयुद्धेषुनहिमर्द्धयतिनखलुहिनास्तिशत्रुभिःरुतांहिंसांनसहतइत्यर्थः॥हेनरोनेतारोयूयंअस्मेजनाय
अराध्वंकामानदत्त॥नंजनंनहिनस्ति॥इतिसंबंधः॥नवीयसीनवतरावोयुष्मदीयासुमतिस्तुयहद्वुङ्गिःअभ्यावर्त्ते
अस्मान्अभ्यावर्त्तताम्॥तथाहेपीपिबवःसोम्यपानकामाःयूयमपिनूयंक्षिप्रंयातआगच्छत॥छ॥अथपंचमी॥य
द्युष्माधिराधसइति॥हेदृक्षिराधसःपरस्परंसंश्लिष्टानिसुहंतानिराधांसियेषांतेहेमरुतोयूयंअंधांसिसोमलक्ष राम
णानिहर्षीविपीनयेमहत्त्वाणार्थंसुषुवुयातनआयाताहियस्मात्कारणात्हेमरुतोवोयुष्माभ्यंइमाइमानि १००

हव्याहव्यानि हवींषि रे अहं ददामि अतः कारणा यूयं अन्यत्र नो युगं तन मागछत ॥ ६ ॥ अथ षष्टी ॥ आ च
नो वर्हिः इति ॥ हे मरुतो यूयं नो अस्मदीये वर्हिः कुशमये वर्हिषि आ सदत च उपविशत अस्माहोरिणि स्पार्हाणी यानि व
सुवसूनि धनानि दात वे अस्मभ्यं दातुं नो अस्मान् अवित च आगछत च हे मरुतः अस्रेधंतः अहिंसंतो यूयं इह अस्मिन् अन्य
से मेधे मदकरे सोम्ये सोमात्मके हविषि स्वाहाकारेण मादयाध्वै मादयध्वं मा द्यत ॥ ७ ॥ इति पंचमस्य चतुर्थे
कोनत्रिंशो वर्गः ॥ अथ सप्तमी ॥ सस्वश्चिद्धीति ॥ सस्वः अंतर्हिता मरुतः तन्वः स्वकीयान् अंगानि शुंभ
मानाः अलंकरणैः शोभयंतो मरुतो नीलपृष्ठाः असितवर्णाः हंसासो हंसा इव अपप्तन् आपतं
तु आगछंतु विश्वं शर्द्धः व्याप्तो मरुद्गणः मामां अभितः समंतात् निषेदत्तु ॥ तत्र दृष्टांतः ॥ सवने अस्म
दीये यज्ञे मदंतो हृष्यंतः रण्वाः रमणीयाः नरो न मत्तुष्या इव तद्द्विता ॥ साकमेधेषु मरुद्भ्यः सांतपने ।
भ्यः इत्यस्य यो नो मरुतः इति श्रुविंतु वाक्या सांतपना इदमिति याज्या ॥ तथा च सूत्रितं च असांतपना इ
दं हविरिति यो नो मरुतो अभि दुर्हृणायुरिति ॥ मे षाः सूक्ते ष्टमी ॥ यो नो मरुत इति ॥ हे वसवः प्रशस्याहे
मरुतः यो नो अस्मदीयानि चित्तानि दुर्हृणायुः अशोभनं क्रुध्यन् तिरः वैसस्त्रिर रन्हतो योजनः अभिजिघांसति आमि

वे·भा· सुखेनहंतुमिछतिसजनदुःखपापानांद्रोग्धुर्वरुणस्यापाशान्अस्मासुगतिसमुचीत्वबध्नीयाषतय्यूयंतंजनं
९१ तपिष्ठेनतस्तमेवहन्मनाहननसाधनेनायुधेनहंतनहतहिंसा॥छ॥अथनवमी॥सांतपानाइति।सांतपनाःश
त्रूणांसंतापकाःहेमरुतःइदंसत्यंसेणोपलभ्यमानंहविःयुष्मभ्यंकल्पितमितिशेषःहेरिशादसःरिशातांहिं
सतांअसितारःरिशानामत्तारोवायूयंयुष्माकंऊतीऊत्यारक्षयातस्मादहंशंहविर्जुहुत्वनसेवध्वं॥छ॥गृहमेधास
इति।हेगृहमेधमगृहेक्रियमाणेोयज्ञोयेषांतेसुदानवःशोभनदानाहेमरुतोयूयंयुष्माकयुष्माकंऊतीऊत्यार
सयायुक्ताःआगतअस्मदीयंयज्ञंप्रत्यागछतहेमरुतःमापमूतनअपगतामाभवतयूत्रमर्कंगृणातेत्तुरायेति।अ
सावितिधातुः॥वैश्वदेवेपणिमाहृतस्यानुवाक्या।इहेहवइत्येषा॥सूत्रितंचाइहेहवःस्वतवसःकविवकर्मंगृणातेतु
रायेति॥सेषासूक्तेचैकादशी॥इहेहवइति।हेस्वातवसःस्वायत्तबलाःस्वयंभवदृद्यावाहेकवयःक्रांतदर्शनःसूर्यत्वचः
सूर्यवर्णाःएवंभूताहेमरुतोयूयंइहेहइहेवअस्मदीयंयज्ञंभ्रात्वहणेऽभजामिकल्पयामि॥छ॥अथद्वादशी॥त्र्यंबक
मिति।अत्रशोनकःत्रिरात्रंनियतोपोष्यअपयेत्पायसंचरुं।तेनाहुतिशतंपूर्णंजुहुयातशंसितव्रतः।समुद्दिश्यमहा राम
देवंत्र्यंबकंत्र्यंबकेमृचा॥एतत्सर्वेशमांकरुवाजीवेदूर्षशतंसुखी॥ ९१

101

॥छ॥ इति पंचमस्य चतुर्थे त्रिंशो वर्गः॥ वेदार्थप्रकाशेतमोहार्दंनिवारयन्पुमर्थांश्च
तुरोदेयाद्विद्यातीर्थमहेश्वरः॥ इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये पंचमाष्टके च
तुर्थोऽध्यायः॥छ॥ यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्। निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥ व्याख्यातनि
गमाभिज्ञः पंचमस्य चतुर्थकं॥ अध्यायं सायणाचार्यः पंचमं व्याकरोत्यथ॥छ॥ तत्र यदद्य सूर्येति द्वादशर्चं
पंचमं सूक्तं॥ अत्रानुक्रमणिका॥ यदद्य मैत्रावरुणं तु वै सौर्याद्येति॥ मंडलद्रष्टा वसिष्ठ ऋषिः अनुक्रांता त्रिष्टुप् छं
दः॥ इष्टकवादेनदानि सप्तसूनि मित्रावरुणदेवत्यानि आद्या धा सूर्यदेवत्या विनियोगो लैंगिकः॥छ॥ तत्र प्र
थमा॥ यदद्य सूर्येति॥ हे सूर्य सर्वस्य प्रेरक एतन्नामक देव उद्यन् उदयं गच्छन् यद्यदि अद्यास्मिन् अनुष्ठानकाले अस्मान् ज
वः ब्रूयाः किमिति अनाः अनागस इति एते अपापा इति यदि देवेषु मध्ये ब्रूयाः तर्हि वयं हे अदिते अदीनवे देववयं
देवत्रा देवेषु देवानां मध्ये मित्रावरुणाय च सत्यं अवितथं स्याम अनागसो भवेम॥ किंच हे अर्यमन् दातः त्वां गृ
णंतः स्तुवंतः तव प्रियासः प्रियाः स्याम त्वल्लोमविषया भवेम यद्वा उत्तरार्ध एकं वाक्यं॥ हे अदिते अर्यमन् उक्त
लक्षण देव वयं देवेषु मध्ये त्वां गृणंतः तव प्रियाः स्याम॥ यदि मां देवेषु अपापं ब्रूयाः तर्हि तेऽस्य मनपराधीन्य

वे॰भा सुगृहीतस्तुंस्तुवातवषियोनवेयमित्यर्थः॥छ॥अथद्वितीया॥एषस्यइति॥हेमित्रावरुणाएषवःपुरतोदृश्य
१०२ मानःस्यःसःसवैस्तुवेचयनसमिद्धिःसूर्यःउभेद्यावापृथिव्यावमित्रअमिलक्ष्यउदेतिअन्तरिक्षेगच्छन्सविशेष
तो॥विश्वस्यसर्वस्यस्थातुःस्थावरस्यजंगमस्यजंगमस्यचगोःगोपायिताकिंकुर्वन्मर्त्येषुमनुष्येषुस्विन्नानिसंज्
निसुकृतानिवृजिनावृजिनानिपापानिचपश्यन्॥छ॥अथतृतीया॥अयुक्तसप्तेति॥हेमित्रावरुणामित्रावरु
णोयुवयोरागमनायसधस्थात्सहस्थानादंतरिक्षात्अंतरिक्षेसमसर्पणस्वभावातैतसंख्याकान्वाहरितो
रिहर्यान्अयुक्तअयुक्तवान्स्यरथेहरितआदित्यसप्ततिहिनिरुक्तं॥याहरितईमेनंसूर्यदेवंघृताचीईताचनाउदकवच्या
उदकसद्याइत्यर्थः॥तादृश्यःसत्योवहंतितात्आयुक्तअथोदितःमनुधमानितस्थानानालोकानुजनिमानिजन्मा
निजन्मसाजःप्राणिनइत्यर्थः॥तांस्वयुक्तवांकुःयुवांकामयमानोयोदेवःसंचष्टेसम्यक्पश्यंतिपृथग्वगोपूया
नीवयूथयाःसयथासर्वंयूथंतद्वांतद्गोप्यन्निंचसम्यक्पश्यंतितद्वत्लोकन्प्राणिनस्वपश्यति॥छ॥अथचतु
र्थी॥उद्वांपृक्षासइति॥हेमित्रावरुणौवांयुवयोरर्थायपृक्षासोन्नानिचरुपुरोडाशादीनिमधुमंतोमाधुर्योपेतानितत् राम
साधनान्योषध्यादीनिवाउद्रस्थुःसंपादितान्यासन्सूर्यस्यसुक्तंदीप्तंअसर्पःअसर्पवमंतरिक्षंआरुहत्आरोहयति १०२

यस्मै सूर्यो यत उरुक्रमनार्यमादित्याश्चादितेः पुत्रा देवा अथ च नो मार्गान् दृढं तिति विलिखंति साधयंति। कृतो मि
त्रो अर्यमा वरुणश्चैते त्रयोपि देवाः सजोषसः समाना सा प्रीतयः संतः सदैव आरुहहरिति॥ छ॥ अथ पंचमी॥ इमे
चेतार इति। इमे मित्रो अर्यमा वरुणश्च त्रयोपि अनृतस्य पापस्य भूरेः प्रभूतस्य चेतारो हंतारः संति भवंति हि। इ
मे मित्रादयः सतस्य यज्ञस्य दुरोणे गृहे वर्द्धुः वर्द्धंते ह विशाः सु याः च कीदृशा क्लेशः प्रमासः सुखकराः अदि
तेः पुत्राश्च दब्धा अहिंसिता॥ छ॥ अथ षष्ठी॥ इमे मित्र इति॥ इमे आदित्या मित्रो वरुणश्च एतत्त्रद्वयं अर्यमा अ
ध्यफलस्य णं एते दूलभासः दुलभाः अनभिभाव्या अचेतसं चित्तस्य अज्ञानं अनुष्ठान विषयज्ञानरहितमपि
दसैः अपिकातुं सुचेतसं प्रकृतज्ञानवंतं पुरुषं कातुं कर्त्तारं कर्मानुष्ठानवंतं गच्छता। अहो दुःस्तानि रष्विम्नाति रे
नयंतोस्मात् सुपथा शोभनेन मार्गेण नयंति प्रापयंति अभिमतं मयज्ञं स्वर्गादिकं वा॥ छ॥ इति पंचमस्य पंच
मेशयमो वर्गः॥ अथ सप्तमी॥ इमे दिव इति॥ इमे मित्रादयो दिवो द्युलोकस्य पृथिव्याश्च संबंधिनः अनिमिषा
अनिमेषेण सर्वदा चिकित्वांसो जानंतः कं अचेतसं अज्ञानं नयंति प्रापयंति कर्माणि प्रजाजे चित अवणोपि
अयंतानि म्नापि देशेन घोनघाः गाधमस्ति भवति पुरुषस्य मर्थानं महांतो नो अस्माकं अस्य विषितस्य व्याप्तित

वे॰भा॰ स्वकर्मणः पापं परिषं नृपारयन्तु नयन्तु ॥ छ ॥ अथाष्टमी ॥ यज्ञोपावदिति ॥ यत् कर्म सुरवं गृहं वाणोपावत रक्षणे
१०३ पेतं भद्रं सुखं यं अदितिरदीनो र्यमा अदितिर्वा मित्रो वरुणश्चैते त्रयो देवाः सुदासे सुदानाय मघं यच्छंति अस्य छंतित
स्मिन् शर्मणि तोकं पुत्रं तनयं तत्सुतादिकं अथवा तनयशब्दोपत्यमात्रमान्यवचनः तोकं बलवंतं पुत्रं आसर्वते
दधना अयंतो वहयं हे तुरासो गमनाय त्वरमाणा हे वहे तनं देवानां मित्रादीनां कोपनं मा कर्म कामा स्म ॥ छ ॥ अ
थ नवमी ॥ अववेदिमिति ॥ हे मित्रादयः सोस्मत् द्वेषी वेदियां गमाधनं होत्राभिः वाङ्मिमेतत् वा यूपाभिः स्तुतिभि
103 र्हे अवयजेत वेधां कर्माणि कुर्वन् देवान् स्तुयादित्यर्थः । अवपूर्वो यजतिस्त्यजनार्थः । स किं प्राप्नुयादिति त
त्राह वरुणक्षितिः वरुणेन त्वया हिंसितः स काश्विद् द्वियोहिंसाः प्राप्नुयादिति शेषः । अस्मां त्वर्यमा देवो द्वेषो मि
द्वेष्टृभी रक्षः अभ्रतिभिः परिवृण कुरु वर्जयतु उरुं उविस्तीर्णं लोकं स्थानं सुदासे शोभनवानाय मघं प्रयच्छतं हे वृ
षणा यर्षको कामानां मित्रावरुणौ ॥ छ ॥ अथ दशमी ॥ एषां मित्रादीनां समतिः संगतिः संहतिर्वा सत्वः अंत
र्हितानिगूढा द्वेषी रीप्सा च भवति ॥ नाहशा एते अपी च्येन एतद्यं तर्हितनामानिगूढेन सहसा बलेन सहन्ते अभिभ राम
वंति अस्मद्द्वेष्टॄन् ॥ किंच हे वृषणो अभिमत वर्षका मित्रादयो युष्माकं भयात् भीत्या ओरज्जमानाः कंपमाना मवे १०३

तिविरोधिनन्यस्माद्देवात्स्माद्दस्य पुष्मकं बलस्य महिना महिम्ना महित्वेन नोस्मभ्यं मृळत उपदयां कुरुतं ॥ ५
॥ अथैकादशी ॥ यो ब्रह्मण इति ॥ यो यजमानो ब्रह्मणे परिवृढस्तकर्मणे युष्मस्तोत्ररूपाय सुमतिं शोभनां
बुद्धिं आयजते यजनिर्दानकर्मा दानेर्द्दाति करोति ॥ किमर्थं वाजस्यान्नस्य सातौ दाननिमित्तं परमस्योत्कृष्टस्य रायो
धनस्य च सातौ तस्य अर्यः ईश्वरस्य तिस्तुतिं प्रेरयतीत्यर्थः ॥ स्तोता नानासोमन्यः स्तोत्रं मघवानो दानवंतो यीमा दयमाः
संतः सचंते मे विश्वा वचनस्तोरुक्षया यानि विस्तीर्णानि धामान्यपि सुधानु सुधाम शोभनं छानं चक्रिरे कुर्वंति ॥ ११ ॥ अथ द्वा
दशी ॥ इयं देवेति ॥ अनया स्तुतिमुपसंहरति ॥ हे देवा देवौ मित्रावरुणौ युवभ्यां युवाभ्यां यज्ञेषु इयं पुरोहितिः पुरस्क्रिया
पूजा स्तुतिलक्षणा अकारि कृता मूषु नो मे विश्वा विश्वानि सर्वाणि दुर्गा दुःखानि गंतव्यानि आपदः पिपृतं निस्कृतं
तथा कृत्वा नोस्मान् अपि पृतं पारयतं ॥ शिष्टोगतः ॥ १२ ॥ इति पंचमस्य पंचमे हितीयो वर्गः ॥ १२ ॥ उद्वां चक्षुरिति सप्तर्चं
षष्ठं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं मैत्रावरुणं ॥ उद्वां सप्तेत्यनुक्रमणिका ॥ विनियोगो लैंगिकः ॥ १ ॥ तत्र प्रथमा ॥ उ
द्वां चक्षुरिति सप्तर्चं षष्ठं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं मैत्रावरुणं ॥ उद्वां सप्तेत्यनुक्रमणिका ॥ विनियोगो लैंगिकः ॥
१ ॥ तत्र प्रथमा ॥ उद्वां चक्षुरिति ॥ हे मित्रावरुणौ देवयोर्द्योतमानयोर्वां युवयोश्चक्षुः प्रकाशकं तेजः सुप्रतीकं शो

वे॰भा॰ मनस्तुष्टुंएवंरूपःसूर्यःततन्वान्तेजोविस्तारयन्नुदेवोयोसौविश्वासर्वाणिभुवनानिभूतजातानिअभिचष्टेअ
१॰४ भिपश्यतिसदेवोमर्त्येषुगव्यन्तंमन्यस्तोत्रंकर्मवाआचिकेतिआजानाति॥छ॥अथद्वितीया॥अथद्वितीया
॥प्रवांमहि॥द्यो॥हेमित्रावरुणौवांयुवयोर्जन्मानिमननीयानिस्तोत्राणिसप्तमिन्द्रःविप्रोमेधावीसलवायज्ञवा
105 न्दीर्घश्रुत्चिरकालंश्रोताएवमुक्तलक्षणोवसिष्ठइयर्त्तिप्रेरयति॥यस्यसबेर्धुर्ध्मानिपरिवृढानिस्तोत्रा
णिहेसुक्रतूशोभनकर्माणौअवाथरक्षथ॥यकर्मशरदोबह्वनूसंवत्सरानूआप्राणौथेआपूरयथेसउरिष्यति॥छ
॥अथतृतीया॥प्रोरोर्मित्रावरुणौ॥हेमित्रावरुणामित्रावरुणौयुवांउरोर्विस्तीर्णायाःपृथिव्याअपिप्ररिरिचा
थेअसेदेवगरिरिचइत्यादिषुघशब्दस्यारिरिचइत्यानेनसहसंबंधदर्शनादत्राप्यत्रविदर्क्रियाध्याहारेणरिरिचे
सुदानूइतियोज्यं॥तथासप्तात्युणैर्महतोवृहतःस्वरूपतोतिमहतोदिवोद्युलोकादपिप्ररिरिचाथेहेसुदानू
शोभनदानौकिंचयुषधीयुविषुप्रजासुनिमित्तभूतासुप्रजासुचेतिवासप्तशोरूपंदधारयेथे॥किंकुर्वतोसधक्तय
वस्सधक्रसधक्रूसचान्नयतः॥विविक्तात्मस्पेनगच्छतोजनान्अनिमिषंअप्रयत्वधानेनसर्वदारक्षमाणापालयथो॥छ राम
॥अथचतुर्थी॥प्रसंशामित्रस्येतिहेसखेमित्रस्यवरुणस्यवधामतेजःस्थानंशंसप्रशस्तुहिययोर्देवयोःशुष्मोवलंरोरस्मी १॰४

द्यावापृथिव्योसहवर्त्तमानेमहित्वास्वमहत्त्वेनबहुधैवभ्रातिष्ठथस्वकापयवाअवीराअप्रुत्राएवायन्नूयं
उग्रंछ्रुमुतहृपरीतोयज्ञमन्मायज्ञार्थमतिमानयज्वावृजनंबलंगतिरातेअवहेतुगपूर्वेस्तिरतिवर्द्धमान्यः॥ छ
॥ अथपंचमी॥ अमूराविश्वेतिहे अमूरा अमूढौहेविश्ववाज्ञौहेवृषणौवर्षितारौयुवांइमाइमानिस्तुतिवचां
सिक्रियंतेयासुस्तुतिस्तुतिवचांसिचाग्वर्त्तनंदृशेनदृश्यतेनयसंनूपूजाःदृश्यतेयुवाभ्यांमहिम्नोपिमहत्वावयत्ने
नुक्रियमाणमपिस्तोत्रंनचमकरोतीत्यर्थः॥ जनानामन्यत्ताअस्तुत्यविषयाणिस्तोत्राणिद्रुहोद्रोग्धारःसचंतेने
सेवंतेनमहान्तःवांयुवाभ्यांक्रियमाणानिमित्रपाणिनि [illegible] हितानिरहस्यान्यपिस्तोत्राणिअचित्तेअज्ञानाय
भूवन्भवंति॥ छ॥ अथषष्ठी॥ सम्युवोयज्ञमिति॥ हेमित्रावरुणौवांयुवयोर्यज्ञंनमोभिर्नमस्कारैःस्तुतिभिःस
मुमहयंसंपूजयाम्यहंतदर्थंहेमित्रावरुणाहेमित्रावरुणौवांसंबाधेबाधयुक्तोहंहवेआह्वयामि॥ बाधप
रिहारायवांयुवांसचमेवितुंनवानिनूतनानिस्तुत्यानिवाममन्मानिस्तोत्राणिगर्भवंत्विस्पष्टाहारःकृतानिमया
समूहीकृतानिइमानीदानींक्रियमाणानिजनपरिष्टानिस्तोत्राणियुवांजुजुषन्नुषणन्सीण्यंतु॥ छ॥ इयंदेवेतिष
त्रमीगता॥ छ॥ इतिपंचमस्यपंचमेद्वितीयोवर्गः॥ छ॥ ५ सूर्यरश्मिएषलंवंसप्तमंसूक्तं॥ अत्रानुक्रमणिका॥ ५ सू

वे॰भा॰ यः षलाघास्ति स्वः सौर्य इति वसिष्ठस्यार्षं त्रिष्टुप्छंदः आद्यास्तिस्रः सूर्यदेवत्याः शिष्टा मित्रावरुणदेवत्या
१०५ ःसूक्तविनियोगो लैंगिकः ॥ ७ ॥ तत्र प्रथमा ॥ उत्सूर्य इति ॥ सूर्यः सर्वस्य प्रेरको देवः उदेति अयं धिकं पुरूणि
बह्वनिअदीपितेजांसि उदेत्येत उद्यं प्रयाति ॥ किंभूतिमानुषाणां मनुष्याणां विश्वासर्वाणि जनिमजनिमानि जि
नानुजनशब्दं संघवचनः तान् प्रयच्छन् एत समदेवो दिवा अहर्निशं च मनाः मनुष्यसमो दृश्यते एकरूपः प्रतिनियतः सन् दृ
श्यते तस्मात् पुरुरूपं पुरुत्वं प्रयाति यो भवतीति हिरण्यकृतः ॥ मस्येच कर्शमर्वस्य कर्त्ता सन् संपादितः प्रजापतिना
कर्देभिः स्तुतिकर्त्तृभिः सुरूपः स्तूयतीत्यर्थः अतो भूत्वमनातिः ॥ ७ ॥ अथ द्वितीया ॥ स सूर्य प्रतितो ॥ हे सूर्य स प्र
सिद्धं त्वं नो अस्मान् प्रति पुरस्तात् उद्गाः उद्गाः अगच्छ केः साधनैः एभिः स्तोमेभिः स्तोमैः स्तुत्यैः एतशेभिः एतवर्णैः
स्वार्थिकः शकारः याजरं स्यायुवशात् पुरुषः नागसोः पापान् प्रवोचः केभ्यः मित्राय वरुणाय आर्यमणे अग्नये
च ॥ अत्र सोर्य इतरेषां मित्रादीनां संकीर्त्तनं तेषामपि निपातनस्त्वादविरुद्धं एवं पूर्वत्रोत्तरत्र च मैत्रावरुणयोर्य
मादीनां संकीर्त्तनमपि न विरुध्यते ॥ ७ ॥ अथ तृतीया ॥ वि नः सहस्रमिति ॥ नो अस्माकं शुरुधः शुचेदुःखस्य प्र राम
तिरोद्धारः सतावानः स पवंतो वरुणादयः सहस्रं सहस्रसंख्याकं धनं वि रंतु वितरंतु अथवा शुरुधः क्र १०५

लक्षणाः सहस्रसंख्याकास्त्रैषघ्नीरद्गु ॥ किंच ते तवांशः आइरा दध्याशिरोस्मभ्यं तु पमंस्तु त्वं अर्कमर्चनीयं
यच्छंतु किंच स्तवाना अस्माभिः स्तूयमानो अस्माकं काममभ्यर्शितं पूपुरं तु पूरयंतु हे सूर्य त्वया अनुज्ञाता इति सू
सूर्यस्य स्तुतिः ॥ छ ॥ अथ चतुर्थी ॥ द्यावाभूमी इति ॥ हे द्यावाभूमी द्यावापृथिव्यौ हे अदीते अखंडनीये एतत्
द्यावाभूम्योरेकोकवचनेन संबोधनं हे सखे महन्नामैतत् महे महत्वो नो अस्मान् त्रासीथां रक्षतं येन वयं सुजनी
मानाः शोभनजन्मानो वां युवां जनुः शानवंतः स्म ॥ किंच वयं वरुणस्य हेले क्रोधे मा भूम तथा वायोर्मा भूम तथा
नरणां स्तुतिनेतॄणां मनुष्याणां प्रियतमस्य मित्र हेले मा भूम ॥ छ ॥ प्रबाहवेति पंचमी मैत्रावरुणपशोः पशु
पुरोडाशस्य याज्या ॥ स्रुचिनीं च ॥ प्रबाहवा सिसृतं जीवसे नो यदंहि शंनातिविसुराहूइतित स्यार्थः स्तु ॥ प्रबाहावति
॥ हे मित्रावरुणा मित्रावरुणौ देवौ बाहवा युवाभ्यां बाहू प्रसिसृतं प्रसारयतं हविः स्वीकाराय धनप्रदानाय वा कि
मर्थमिति ॥ नो जीवसे अस्माकं जीवनाय किंच नो अस्माकं जीवनाय किंच नो अस्माकं गव्यूतिं गावो यंति गच्छंति अत्रे
ति गव्यूतिर्गोमार्गं भूमिः तां तृणादिप्ररोहाय घृतेनोदकेन आसमंतात् उक्षतं सिंचतं ॥ किंच मो अस्मान् जने अस्म
त्समाने मनुष्यसमूहे च आ नो अस्मान् श्रवयतं विख्यातं कुरुतं हे युवानि ॥ यौवनो सर्वत्र व्याप्तौ नाम युवां ममइमाः

वे॰भा॰ मानिहवाअज्ञानानिकृतं शृणुतं॥ छ॥ अथषष्टी॥ नृ मित्रोवरुणइति॥ मित्रोवरुणोर्यमाचैतेत्रयोदेवानुत्र
१०६ घनोस्माकंत्मनेआत्महितायकोतोकायसुजायतवतौ वोधनंदधंतुशयच्छंतुनोस्माकंविश्वासर्वाणिगंत
व्यानिसुगासुगमनानिसुपथानिसंतुभवंतु॥ शिष्टंगतं॥ इतिपंचमस्यपंचमेचतुर्थोवर्गः॥ छ॥ उद्वेतीतिषल्ल
वमष्टमंसूक्तंवसिष्ठस्यार्षंत्रैष्टुभंआद्याश्चततस्रःपंचम्याःपूर्वार्द्धस्यचसूर्यदेवत्याःअवशिष्टात्रयोर्द्धर्चौ
